मानादेवेति । उपमानन्तु शक्तिमात्रपरिच्छेदकतया नेश्वरे बाधकमिति भावः । शब्दस्तु नेश्वरे बाधकत्वेन शङ्कनीयः अनुमानानतिरेकात् इति वैशेषिकाः । पदश्रवणानन्तरं पदार्थस्मरणे एते पदार्थाः परस्परं संसर्गवन्तः आकाङ्क्षायोग्यतादिमत्पदस्मारितत्वात् दण्डेन गामभ्याजेतिपदस्मारितपदार्थवत् इत्यनुमानात् संसर्गसिद्धेः किम्वा एतानि पदानि स्मारितपदार्थसंसर्गप्रमापूर्व्वकाणि आकाङ्क्षादिमत्पदत्वात् इत्यनुमानात् तत्सिद्धेः ज्ञानज्ञानस्य तद्विषयविषयकत्वनियमादित्यप्याहुः ।

अनैकान्तः परिच्छेदे सम्भवे च न निर्णयः ।
आकाङ्क्षासत्तया हेतुर्योग्यासत्तिरबन्धना ॥ १२ ॥

अथ पदार्थपक्षकानुमाने संसृष्टा एवेति यदि संसर्गवत्त्वं साध्यते सम्भावितसंसर्गका इति संसर्गस्वरूपयोग्यत्वं वा आद्ये पयसा सिञ्चतीत्यादावनैकान्तः द्वितीये न संसर्गनिर्णयः अन्वयप्रयोजकरूपवत्त्वरूपयोग्यताया हेतुविशेषणीकृतत्वेन सिद्धसाधनाच्च द्वितीये प्रयोगे आकाङ्क्षासत्तया इति आकाङ्क्षा हि समभिव्याहृतपदस्मारितपदार्थजिज्ञासा घटमित्युक्ते आनय पश्येति आनयेत्युक्ते घटं पटं वेति जिज्ञासादयः । ननु योग्यतासहितासत्तिरेव हेतुरस्तु तत्राह योग्यासत्तिरबन्धना इति व्याप्तिशून्या अयमेति पुत्रो राज्ञः पुरुषोऽपसार्य्यतामित्यत्र निराकाङ्क्षयो राजपदपुरुषपदयोर्व्यभिचारात् ॥ १२ ॥

प्राभाकरास्तु वेदस्यापौरुषेयतया तत्र वक्तृज्ञानानुमानासम्भवात् शब्दः प्रमाणं लोके तु आप्तोक्तत्वज्ञानमपेक्षितं तथाचायं वक्ता स्वप्रयुक्तवाक्यार्थयथार्थज्ञानवान् अप्रमाद्यजन्यवाक्यार्थज्ञानजन्यवाक्यप्रयोक्तृत्वात् इत्यनुमानाद्वक्तृज्ञानावच्छेदकतया संसर्गसिद्धौ उत्तरकालं वा एते पदार्थाः परस्परं संसृष्टाः वक्तृयथार्थज्ञानविषयत्वात्

इत्यनुमानात् साक्षाद्वाक्यार्थसिद्धेः क्लृप्तसामर्थ्यात् शब्दात् पुनस्तत्र धीरित्यनुवादको लौकिकः शब्दो न प्रमाणमिति प्राञ्चस्तत्राह।

निर्णीतशक्तेर्वाक्याद्धि प्रागेवार्थस्य निर्णये।
व्याप्तिस्मृतिविलम्बेन लिङ्गस्यैवानुवादिता ॥ १४ ॥

वेदेऽवधारितसामर्थ्याच्छब्दाल्लौकिकस्थलेऽपि प्रागर्थनिर्णये लिङ्गस्यैवानुवादकत्वं व्याप्तिस्मृतिविलम्बेनानुमानस्य शब्दापेक्षया विलम्बितधीजनकत्वात् ॥ १४ ॥

नन्वाप्तोक्तत्वस्य संशये व्यतिरेके च शब्दे प्रामाण्यानुपपत्त्या निर्णयो हेतुर्वाच्यः। आप्तोक्तत्वञ्च प्रकृतवाक्यार्थगोचरयथार्थधीजन्यत्वमिति वाक्यार्थधीः प्रथमतोऽनुमानादेव वाच्या इत्यत आह।

व्यस्तपुंदूषणाशङ्कैः स्मारितत्वात् पदैरमी।
अन्विता इति निर्णीते वेदस्यापि न तत् कुतः ॥ १५ ॥

आप्तोक्तत्वनिश्चयस्य हेतुत्वे मानाभावः बाधकप्रमाविरहरूपयोग्यताज्ञानविलम्बाद्योग्यान्वयधीविलम्बसम्भवात् अन्यथा वेदेऽपि पौरुषेयत्वधीर्हेतुरस्तु तथाच तत्रापि अमी वैदिका अर्था अन्विताः परस्परसंसृष्टाः व्यस्तपुंदूषणाशङ्कैः पदैः स्मारितत्वात् इत्यनुमानात् संसर्गे निर्णीते तदनुवादकत्वं वेदस्यापि न कुतः। यत्तु पदं न कारणं किन्तु पदार्थ एव अतएव पदार्थकरणकाच्च वाक्यार्थज्ञानात् कवित्वव्याख्यादिकं द्वारमित्यत्र द्वारोपस्थितावपि पदार्थनिष्ठाकाङ्क्षाविरहेणान्वयाबोधः शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्यते इति न्यायात् अतएव पदानामवच्छेदकत्वं पदजन्योपस्थितिं विना पदादन्वयाबोधात्। तदुक्तम् प्राथम्यादभिधातृत्वात् तात्पर्योपगमादपि। पदानामेव सा शक्तिर्वरमभ्युपगम्यताम्। अभिधातृत्वात् पदार्थोपस्थापकत्वात् इति गुरुमतमपास्तं पदानामित्यत्र आप्तानामिति प्रक्षेपेऽपि आप्तत्वावच्छेदकत्वापातात् तथाचावश्यकीकार्यं पदार्थोपस्थितौ

पदमन्यथासिद्धं न कारणमिति तन्न पदार्थानामतीतादिरूपतया अकारणत्वात् पदार्थस्मरणस्यापि निर्व्यापारतया अकारणत्वात् पदज्ञानस्यैव कारणत्वात् पदार्थस्मृतेर्व्यापारत्वात् कविकाव्यादिस्थले च मानसज्ञानं हेतुरिति ॥ १५ ॥

ननु शब्दोऽतिरिच्यतां प्रमाणं स एव बाधकोऽस्तु तथाहि प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः । अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते इति गीतां पठन्ति । प्रकृतेर्बुद्धितत्त्वस्य गुणैः सत्वादिभिः क्रियमाणानि कर्म्माणि मोहादहं करोमीति चेतनो मन्यते तेनाभिमानिकं न पारमार्थिकं कर्तृत्वं न च सर्व्वज्ञस्याभिमानोऽपि विशेषदर्शनात् करोमीति त्वज्ञानं न षष्ठी इत्यत आह ।

न प्रमाणमनाप्तोक्तिर्नादृष्टे क्वचिदाप्तता ।
अदृश्यदृष्टौ सर्व्वज्ञो न च नित्यागमः क्षमः ॥ १६ ॥

अयं हि सर्व्वकर्तृत्वाभावावेदकः शब्दः अनाप्तोक्तत्वेन प्रमाणं आप्तोक्तश्चेदेतदर्थगोचरज्ञानवतो नित्यसर्व्वविषयकज्ञानवत्त्वम् इन्द्रियाद्यभावात् आगमस्य च नित्यत्वं दूषितमेव प्रागिति वेदकारो नित्यः सर्व्वज्ञः सिद्ध इति ॥ १६ ॥

नन्वसत्त्वबोधकागमानां का गतिस्तत्राह ।

न चासौ क्वचिदेकान्तः सत्वस्यापि प्रवेदनात् ।
निरञ्जनावबोधार्थेन च सन्नपि तत्परः ॥ १७ ॥

असावागमोऽनासत्वमाश्रयत्त एव सत्वस्यापि वङ्गशोमत्तः सर्व्वं प्रवर्त्तते इत्यादिभिः प्रतिपादनात् द्वयोश्च न मुख्यार्थत्वं विरोधात् विनिगमकचिन्तायां विशेषगुणशून्यात्मस्वरूपस्य श्रेयस्त्वतात्पर्य्यकत्वं बाधकश्रुतीनां साधकश्रुतीनाञ्च कार्य्यकारणभावादितर्कमूलकानुमानसाचिव्येन मुख्यार्थत्वात् ॥ १७ ॥

ननु यद्यसौ सर्व्वज्ञः स्यात् अनुपदिश्यापि प्रवर्त्तयेदित्युपदेशा-

नुपपत्तिरेव ईश्वरे बाधिका नह्ययमनुपदिश्य स्वयं प्रवर्त्तयितुं न जानाति सर्वज्ञत्वानुपपत्तेः अर्थापत्तिश्च मानान्तरं तथाह ।

छेत्वभावे फलाभावात् प्रमाणेऽसति न प्रमा ।
तदभावात् प्रवृत्तिर्न कर्म्मवादेऽप्ययं विधिः ॥ १८ ॥

प्रमाणेऽसति न प्रमा प्रमाणाख्यहेत्वभावे फलाभावात् प्रमाविरहात् प्रमाविरहे च न प्रवृत्तिः कारणाभावात् प्रमाकरणञ्चाग्निहोमेनेत्यादिविधिरेव इति नोपदेशव्यर्थता अन्यथा कर्म्मवादेऽप्ययं विधिः अदृष्टादेव प्रवृत्तेरुपपत्तेः वेदस्यानर्थक्यापत्तिः नचार्थापत्तिर्म्मानान्तरम् ॥ १८ ॥

तमेवाह ।

अनियम्यस्य नायुक्तिर्नानियन्तोपपादकः ।
न मानयोर्व्विरोधोऽस्ति प्रसिद्धे वाप्यसौ समः ॥ १९ ॥

जीवी देवदत्तो गेहे नास्तीति ज्ञानानन्तरं वहिरस्तीति धीव दाहरणं तत्रानियम्यस्याव्याप्यस्य नायुक्तिर्नानुपपत्तिः अनियन्ता अव्यापको नोपपादकः व्यापकव्यतिरेकेण व्याप्यस्यैव व्यतिरेकात् तादृशानुपपत्तिज्ञाने व्यतिरेकव्याप्तिधीरेव । यदपि क्वचिदस्ति गेहे नास्तीतिज्ञानानन्तरं विरोधज्ञानेऽविरोधाय गेहान्यविषयता क्वचिदस्तीत्यस्येत्यर्थापत्तिरिति तदपि न नतु वास्तवेमानयोर्विरोधः तथा सत्येकं मानं भज्येत विरोधज्ञानस्य तु विषयभेदव्यवस्थापकत्व मनुमानविधयैव तथाहि विरोधोभिन्नविषयकः एकविषयतायां विरुद्धत्वे सति प्रमाणसिद्धत्वादिति अन्यथा धूमोऽप्यनुपपद्यमानो वह्निं गमयेदित्यर्थापत्तिरिति प्रसिद्धमनुमानं न स्यात् अर्व्वाग्भागावच्छेदेन वह्न्यनुपलम्भः धूमश्च वह्निसाधनमिति विरोधेऽपरभागावच्छेदेन वह्निव्यवस्थापनमप्यर्थापत्तिरेव स्यात् अनुमानाभावेऽपि व्याप्तिग्राहकमानस्य वह्निसाधकत्वमर्थापत्तेरित्यनुमानवि-

लोपः स्यादिति अनुपलब्धिश्च नेश्वरे बाधिकेति योग्यादृष्टिरित्यादिनोक्तम् ॥ १९ ॥

वस्तुतोऽनुपलब्धिर्मानान्तरमेव नेत्याह ।

प्रतिपत्तेरपारोक्ष्यादिन्द्रियस्यानुपक्षयात् ।

अज्ञातकरणत्वाच्च भावावेशाच्च चेतसः ॥ २० ॥

यस्माज्ज्ञातानुपलब्धिः कारणं सत् प्रत्यक्षं ज्ञातानुपलब्धिजन्याभावज्ञानस्यानुमानत्वात् जन्यापरोक्षज्ञानस्य इन्द्रियजन्यत्वात् अपरोक्षत्वञ्च ज्ञानकरणकान्यत्वं घटादिप्रत्यक्षइव घटाभावाध्यक्षेऽपीन्द्रियस्यान्यानुपक्षीणत्वात् करणत्वमधिकरणप्रत्यक्षाभावेऽपि शब्दादिध्वंसस्य वायौ रूपाभावस्य ग्रहात् अधिकरणग्रहेऽप्यनुपक्षयात् अज्ञातकरणजन्यज्ञानत्वेन इन्द्रियजन्यत्वानुमानाच्च । भावावेशाच्च चेतसोमनसः अस्मदादिवाह्यानुभवस्य भावभूतकरणसचिवमनोजन्यत्वनियमात् नानुपलब्धिः करणं किन्त्विन्द्रियमेवेति ॥ २० ॥

साधकान्तरमाह ।

प्रतियोगिनि सामर्थ्याद्व्यापाराव्यवधानतः ।

अक्षाश्रयत्वाद्दोषाणामिन्द्रियाणि विकल्पनात् ॥ २१ ॥

इन्द्रियाणिकरणमिति साध्यं प्रतियोगिग्राहकत्वात् यथानुमानं घटस्येव तदभावस्यापि ग्राहकं तद्वदिन्द्रियमपि । ननु प्रतियोगिग्राहकत्वमतन्त्रं अनन्यथासिद्धत्वस्योपाधित्वात् आश्रयग्रहेणान्यथासिद्धेरित्यत्र हेतुः व्यापाराव्यवधानतइति व्यापारेणाधिकरणप्रत्यक्षेण इन्द्रियस्यान्यथासिद्ध्यभावात् अन्यथा संयोगेन चक्षुरादिकमन्यथासिद्धं भावग्रहेऽपि स्यात् किञ्चाभावभ्रमस्य दुष्टकरणजन्यत्वमवश्यं वाच्यं दोषश्चेन्द्रियादिनिष्ठएव अनुपलब्धेर्दोषाभावात् पित्तादिना इन्द्रियस्यैव दुष्टत्वात् तदिदमुक्तम् अक्षाश्रयत्वाद्दोषाणामिति अधिकरणाभावयोर्विशिष्टधीर्नेन्द्रियजा अभावधीत्वात् नानुपलब्धि

कारणता भावधीत्वादतो विशिष्टग्राहीन्द्रियं स्वीकार्य्यं तदिदमुक्तं विकल्पनात् विशिष्टविषयकज्ञानात् ॥ २१ ॥

नन्वनुपलब्ध्या घटाभावस्य ज्ञानं ततश्च घटाभाववद्भूतलमिति ज्ञानं घ्राणजसौरभोपनयानन्तरं सुरभि चन्दनमिति चाक्षुषवत् इत्यभावग्राहिकानुपलब्धिः कारणतया वाच्या निर्विकल्पकविषयीकृत एव इन्द्रियेण सविकल्पकविषयतया गृह्यते तथा दर्शनात् अभावेनेन्द्रियप्रत्यासत्तेरभावात् कथं वा प्रत्यक्षं विशेषणतायाः सम्बन्धान्तरगर्भत्वात् अवश्यक्लृप्तकारणताकानुपलब्धेरेव करणत्वं नेन्द्रियस्येत्यत आह ।

अवच्छेदग्रहध्रौव्यादध्रौव्ये सिद्धसाधनात् ।
प्राप्त्यन्तरेऽनवस्थानान्न चेदन्योऽपि दुर्घटः ॥ २२ ॥

अवच्छेदग्रहस्य प्रतियोगिग्रहस्याभावप्रत्यक्षहेतुत्वात् नियमतः सविकल्पकज्ञानसामग्रीसत्त्वान्न निर्व्विकल्पकत्वं घटादिग्रहे तु निर्व्विकल्पकमेव प्रथमतः । विशिष्टज्ञानहेतुविशेषणज्ञानाभावात् प्रतियोग्यनुपहितस्याभावस्य भानाभ्युपगमे तु अभावस्यापि निर्व्विकल्पकविषयतेति सिद्धसाधनम् । सम्बन्धान्तरेऽनवस्थानात् स्वरूपमेवाभावस्याधिकरणेन सम्बन्धः वैशिष्ट्यस्याभावसम्बन्धस्याङ्गीकृतस्यापि सम्बन्धधारायामनवस्थानात् स्वरूपसम्बन्धस्वीकारस्यावश्यम्भावात् इन्द्रियसम्बद्धविशेषणताया घटाभावादिप्रत्यक्षे सन्निकर्षतया कल्पनात् नचेदेवं तदानुपलब्धिकारणतापक्षेऽपि अन्यप्रकारो दुर्घटः तथाहि सर्व्वैरेव प्रमाणैः परम्परया निर्व्विकल्पकविषय एव गृह्यतेऽनुमानादावपि वह्न्यादेः पूर्व्वं कदाचिन्निर्व्विकल्पकस्वीकारात् घटाभाववद्भूतलमित्यादिविशिष्टप्रत्ययबलात् अभावेनाधिकरणस्य प्राप्तेर्भवतापि स्वीकारात् ॥ २२ ॥

स्तबकार्थसंग्राहकश्लोकमाह ।

प्रत्यक्षादिभिरेभिरेवमधरो दूरे विरोधोदयः
प्रायो यन्मुखवीक्षणैकविधुरैरात्मापि नासाद्यते ।
तं सर्व्वानुविधेयमेकमसमस्वच्छन्दलीलोत्सवम्
देवानामपि देवमुद्भवदतिश्रद्धाः प्रपद्यामहे ॥ २३ ॥

इति तृतीयः स्तवकः ।

यस्येश्वरस्य मुखनिरीक्षणैकविधुरैर्धर्म्मिग्राहकमानबाधितैः प्रत्यक्षादिभिरात्मैव नासाद्यते विरोधोदयोऽयतोऽधरः अतएव दूरे सर्व्वमनुविधेयं वश्यं यस्येति असमा स्वच्छन्दा चेतनान्तराप्रयोज्या या लीला सैवोत्सवोऽयस्य स तथा दुःखाभावैकनिदानत्वादतएव उद्भवदतिश्रद्धाः देवानामपि देवं स्तुत्यं प्रपद्यामहे ॥ २३ ॥

इति तृतीयस्तवकव्याख्यानम् ।

सत्वेऽपि तस्याप्रमाणत्वात् इति तुरीयविप्रतिपत्तिः । ईश्वरो न मानं तज्ज्ञानस्यागृहीतग्राहित्वाभावेन प्रमात्वाभावात् ईश्वरस्य प्रमाकर्तृत्वं प्रमाकरणत्वञ्च नास्तीति अप्रमाणपुरुषस्य वचः कः श्रद्दध्यादित्यत्राह ।

अप्राप्तेरधिकप्राप्तेरलक्षणमपूर्व्वदृक् ।
यथार्थोऽनुभवो मानमनपेक्षतयेष्यते ॥ १ ॥

अपूर्व्वदृकत्वं अगृहीतग्राहित्वं न प्रमालक्षणं धारावहनबुद्ध्य व्याप्तेः इदं रजतमितिभ्रमातिव्याप्तेश्च । स्वमते लक्षणमाह यथार्थ इति अनपेक्षतयेति स्मृतेर्जनकानुभवसमानविषयतया तत्प्रामाण्याधीनप्रामाण्यकतया तत्र सापेक्षत्वात् न प्रमाव्यवहारस्तान्त्रिकाणामिति ॥ १ ॥

ननु धारावाहिके नाव्याप्तिः ज्ञानेन हि विषयनिष्ठोधर्म्मः कश्चिज्जननीयः अन्यथा ज्ञानस्य विषयनियमो न स्यात् तथा च तमादायागृहीतग्राहित्वमेव किञ्च स धर्म्मस्तदुपादानज्ञानजन्यो न वा आद्ये उपादानज्ञानस्य उपादानविषयतानियमार्थं धर्म्मान्तरस्वीकारे तत्राप्येवमनवस्था द्वितीये कार्य्यत्वं हेतुः तत्रैव उपादानज्ञानजन्यत्वं व्यभिचारीति नेश्वरस्य क्षित्यादिकर्तृतया सिद्धिरित्यत्राह ।

स्वभावनियमाभावादुपकारोऽपि हि दुर्घटः ।
सुघटत्वेऽपि सत्यर्थेऽसति का गतिरन्यथा ॥ २ ॥

स्वभावविशेष एव विषयतानियामकः अन्यथा ज्ञातताधानेऽपि नियमानुपपत्तिः इति स्वभाव एव नियामकस्तत्रेति किञ्च वर्त्तमान विषये तदुत्पत्तावपि अविद्यमाने विषये ज्ञाततायाः उपादानविर-

त्वात् अनुत्पत्तौ विषयतानियमानुपपत्तिरिति स्वभाव एव तत्र नियामकइति ॥ २ ॥

ननु क्रियया कर्म्मणि किञ्चिज्जननीयमितिव्याप्तेर्ज्ञानक्रिययापि विषयनिष्ठोधर्म्मोजननीय इत्यत आह ।

अनैकान्तादसिद्धेर्वा न च लिङ्गमिह क्रिया ।
तद्वैशिष्ट्यप्रकाशत्वान्नाध्यक्षानुभवोऽधिके ॥ ३ ।

क्रिया यदि धात्वर्थस्तदा शरेण गगनं युनक्ति इत्यत्र संयोगेन गगननिष्ठकिञ्चिदजननात् अनैकान्तः यदि कारकव्यापारः क्रिया तदापीन्द्रियसंयोगादिना घटादिनिष्ठकिञ्चिदजननात् व्यभिचारः अथ क्रिया स्पन्दस्तदा ज्ञानस्य स्पन्दानात्मकत्वादसिद्धिः । ननु ज्ञातोघटः साक्षात्कृतोघट इत्यादि प्रत्यक्षमेव ज्ञाततायां मानमित्यत आह तद्वैशिष्ट्येति सर्व्वत्र विशिष्टज्ञाने विशेषणविशेष्यतदुभयसम्बन्धविषयः स च सम्बन्धः क्वचित् संयोगादिः क्वचित् स्वरूपं तदिह घटे ज्ञानमित्यत्रेव घटज्ञानयोः स्वरूप एव सम्बन्धः ज्ञातो घटइत्यत्रापि भासते अन्यथा इष्टोघटः कृतोघट इत्यत्र इष्टताकृततयोरप्यापत्तेः ॥ ३ ॥

स्वभावसम्बन्धादुपपत्तिस्तुल्या तदुच्यते ।

अर्थेनैव विशेषोहि निराकारतया धियाम् ।
क्रिययैव विशेषोहि व्यवहारेषु कर्म्मणाम् ॥ ४ ॥

यथा घटादीनां ज्ञाने विशिष्टधीः यथा च क्रिययैव कर्म्मणां घटादीनां व्यवहारेषु विशिष्टबुद्ध्यादिषु विशेषस्तथा ज्ञातोघट इत्यादौ ज्ञानेनैव घटादौ विशिष्टधीर्न धर्म्मान्तरादिति ॥ ४ ॥

ननु तथापि नेश्वरज्ञानं प्रमा प्रमाणजन्यत्वाभावात् एवमीश्वरेण प्रमाता न वा प्रमाणं प्रमाकर्त्तृत्वकरणत्वयोरभावादत आह ।

मितिः सम्यक्परिच्छित्ति स्तद्वत्ता च प्रमातृता ।
तदयोगव्यवच्छेदः प्रामाण्यं गौतमे मते ॥ ५ ॥

यथार्थानुभवत्वं प्रमात्वमजन्यत्वेऽपीश्वरज्ञानस्याविरुद्धं प्रमातृत्वं प्रमासमवायित्वम् एतच्च अकारणत्वेऽपि प्रमाया ईश्वरस्य सिद्धम् एवं प्रमया सहायोगव्यवच्छेदेन अभेदे तृतीया सम्बन्धितयेश्वरस्य प्रमाणत्वं न तु करणत्वमपि तत्र नियामकमिति मन्वायुर्वेदवत् तत् प्रामाण्यमाप्तप्रामाण्यादिति सूत्रे ईश्वरस्य प्रामाण्यमुक्तं नचे-श्वरस्य पञ्चमप्रमाणत्वापत्त्या विभागव्याघातः प्रमाकरणाभिप्रायेण विभागसम्भवात् । नचेश्वरज्ञानस्य भ्रमविषयकत्वे भ्रमविषयाव-गाहित्वे च भ्रमत्वापत्तिरिति वाच्यं व्यधिकरणप्रकारकत्वाभावेन प्रमात्वाभावात् भ्रमनिष्ठशुक्तिविशेष्यकत्वं रजतत्वप्रकारकत्वञ्च सदेव तदवगाहितया ईश्वरज्ञानस्य प्रमात्वाच्चेति ॥ ५ ॥

स्तबकार्थसंग्राहकश्लोकमाह ।

साक्षात्कारिणि नित्ययोगिनि परद्वारानपेक्षस्थितौ
भूतार्थानुभवे निविष्टनिखिलप्रस्तावविवस्तुक्रमः ।
लेशादृष्टिनिमित्तदुष्टिविगमप्रभ्रष्टशङ्कातुषः
शङ्कोन्मेषकलङ्किभिः किमपरैस्तन्मे प्रमाणं शिवः ॥ ६ ॥

इति चतुर्थः स्तबकः ।

भूतार्थानुभवे यथार्थानुभवे साक्षात्कारिणि प्रत्यक्षे निविष्टो-विषयीभूतोनिखिलप्रस्तावविवस्तूनां नानापदार्थानां क्रमोयस्य स तथा अनुभवविषयसकलविश्वक इत्यर्थः नित्ययोगिनि सदातनयुक्ते अत-एवेन्द्रियाणां द्वाराणामनपेक्षा स्थितिर्यस्य लेशतोऽप्यंशतोऽपि अदृष्टि-र्विशेषादर्शनं तन्निमित्तिका या दुष्टिः रागद्वेषमोहात्मिका तद्विग-मेन प्रभ्रष्टः शङ्कातुषः वेदाप्रामाण्यशङ्कालेशोयस्मादित्यर्थः प्रमाणं शिवः स्वयम्भूस्ते तदप्रामाण्यशङ्कापकलङ्कवद्भिः पापण्डैः किं कार्यम् मित्यर्थः ॥ ६ ॥

इति तुरीयस्तबककारिकाव्याख्यानम् ।

तत्साधकप्रमाणाभावात् इति पञ्चमविप्रतिपत्तिः नन्वीश्वरे साधकप्रमाणमेव नास्तीत्यत आह ।

कार्य्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः ।
वाक्यात् सङ्ख्याविशेषाच्च साध्योविश्वविदव्ययः ॥ १ ॥

क्षित्यादि सकर्त्तृकं कार्य्यत्वात् घटवत् सकर्त्तृकत्वञ्च उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वम् । आयोजनं कर्म्म एवञ्च सर्गाद्यकालीनद्व्यणुकारम्भकपरमाणुद्वयसंयोगजनकं कर्म्म चेतन प्रयत्नपूर्व्वकं कर्म्मत्वात् अस्मदादिशरीरक्रियावत् । धृतीति ब्रह्माण्डादि पतनप्रतिबन्धकीभूतप्रयत्नवदधिष्ठितं धृतिमत्त्वात् वियति विहङ्गम धृतकाष्ठवत् धृतिश्च गुरुत्ववतां पतनाभावः । धृत्यादेरित्यादिपदात् नाशपरिग्रहः ब्रह्माण्डादि प्रयत्नवद्विनाश्यं विनाशित्वात् पाट्यमानपटवत् । पदात् पद्यतेऽनेनेतिव्युत्पत्त्या पदं व्यवहारः पटादिसम्प्रदाय व्यवहारः स्वतन्त्रपुरुषप्रयोज्यः व्यवहारत्वात् आधुनिकलिप्यादिव्यवहारवत् । प्रत्ययतः प्रामाण्यात् वेदजन्यज्ञानं कारणगुणजन्यं प्रमात्वात् प्रत्यक्षादिप्रमावत् । श्रुतेर्वेदात् वेदः पौरुषेयोवेदत्वात् आयुर्वेदवत् । किञ्च वेदः पौरुषेयोवाक्यत्वात् भारतवत् वेदवाक्यानि पौरुषेयाणि वाक्यत्वात् अस्मदादिवाक्यवत् । संख्याविशेषात् द्व्यणुकपरिमाणं संख्याजन्यं परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वात् तुल्य परिमाणकपालद्वयारब्धघटपरिमाणात् प्रकृष्टताद्दृशकपालद्वयारब्ध घटपरिमाणवत् अणुपरिमाणञ्च न परिमाणजनकं नित्यपरिमाणत्वात् अणुपरिमाणत्वाद्वा एवञ्च सर्गादौ द्व्यणुकपरिमाणहेतुपरमाणुनिष्ठ द्वित्वसंख्या च नास्मदाद्यपेक्षाबुद्धिजा अतस्तदानीन्तनापेक्षाबुद्धि-

रीश्वरस्यैवेति । विश्वविदव्ययइति विशिष्टस्याव्ययत्वं तेन नित्यसर्व्व विषयकज्ञानसिद्धिः ॥ १ ॥

ननु शरीरविशिष्टस्य कर्तृतया विशेषणबाधात्मकोविशिष्टबाध इति कर्तृजन्यत्वव्यापकशरीरजन्यत्वाभावात् कर्तृजन्यत्वाभाव इति सत्प्रतिपक्षता च । यद्वा कर्त्ता शरीर्य्येव इति व्याप्तिर्विरोधिनी यद्वा व्याप्त्या यथादर्शनप्रवृत्तया शरीरी कर्त्ता च उपनेयः पक्षधर्म्म तया च क्षित्यादावशरीरीति साध्याप्रसिद्धिः विशेषणविशेष्यविरोधश्च यद्वा शरीरजन्यत्वाद्युपाधिना व्याप्यत्वासिद्धिरिति कार्य्यहेतौ पञ्च दोषास्तत्राह ।

> न बाधोऽस्योपजीव्यत्वात् प्रतिबन्धोन दुर्बलैः ।
> सिद्ध्यसिद्ध्योर्विरोधोन नासिद्धिरनिबन्धना ॥ २ ॥

ईश्वरे धर्म्मिणि शरीरबाधात् कर्तृत्वबाधेन अधिकरणज्ञानं विना अभावज्ञानासम्भावात् अस्य कार्य्यत्वस्य धर्म्मिसाधकस्याधि-करणज्ञानजनकतया अवश्यापेक्षणीयत्वेन बलवत्त्वात् एवञ्च न विशे-षणबाधात्मकोविशिष्टबाधः प्रत्यक्षात्मकः ईश्वरोन कर्त्ता अशरीर-त्वात् इत्यनुमानबाधोऽपि नेत्यर्थः । क्षित्यादि न सकर्तृकं शरीरा जन्यत्वात् इति न प्रतिबन्धकं सत्प्रतिपक्षहेतोः शरीरांशवैयर्थ्यात् व्याप्यत्वासिद्ध्या दुर्बलत्वात् । तृतीयेऽपि कार्य्यत्वव्याप्तेः पक्षधर्म्मत्व सहकारात् विपक्षबाधकतर्कावताराच्च बलवत्त्वम् उपन्यस्तायाः कर्त्ता शरीर्य्येवेति व्याप्तेर्दुर्बलतया न प्रतिबन्धः चतुर्थे च यदि पक्षधर्म्मतया अशरीरी उपस्थितस्तदा न विरोधः कर्तृत्वस्याशरीरत्वसमानाधि करणस्योपलम्भात् तदनुपस्थाने तु न विरोधः विरोधाश्रयस्यासिद्धेः पञ्चमे च विपक्षबाधकतर्कसत्त्वात् तदभावनिबन्धनाज्ञानरूपासिद्धि र्व्याप्यत्वासिद्धिर्वा न शरीरजन्यत्वोपाधेरपि विपक्षबाधकाभावेना-पास्तत्वात् ॥ २ ॥

ननु यदीश्वरः कर्त्ता स्यात् शरीरी स्यादिति प्रतिकूलतर्कावतारस्तत्राह ।

तर्काभासतयान्येषां तर्काशुद्धिरदूषणम् ।
अनुकूलस्तु तर्कोऽत्र कार्य्यलोपेविभूषणम् ॥ ३ ॥

प्रतिकूलतर्कास्तावदीश्वरासिद्ध्या आश्रयासिद्धा इत्याभासाः । कर्त्तारं विना कार्य्यं न स्यादिति तर्कस्तु विभूषणं सहकारकः । अहं सर्व्वस्य प्रभवोमत्तः सर्व्वं प्रवर्त्तते इत्यागमश्चात्र । आर्षं धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना । यस्तर्केणानुसन्धत्ते स धर्म्मं वेद नेतर इति तर्कानुगृहीतस्यागमस्य बलवत्वम् ॥ ३ ॥

ननु कार्य्यत्वं प्रयत्नजन्यत्वेऽप्रयोजकम् अत्राह ।

स्वातन्त्र्ये जड़ताहानि र्नादृष्टं दृष्टघातकम् ।
हेत्वभावे फलाभावोविशेषस्तु विशेषवान् ॥ ४ ॥

नहि कर्त्तारं हेतुं विना कार्य्यं परमाणोरेव यत्नवत्त्वेऽचैतन्यानुपपत्तिः अचेतनस्य चेतनप्रेरितस्यैव जनकत्वात् अदृष्टस्य दृष्टकारणसहकारेणैव फलजनकत्वम् । नच चेष्टायामेव भोक्तृप्रयत्नोहेतुः नतु क्रियासामान्ये इति चेष्टायां विशेषप्रयत्नस्य हेतुत्वेऽपि क्रिया सामान्ये प्रयत्नसामान्यस्य कारणत्वानपायात् अन्यथा बीजविशेषस्याङ्कुरविशेषे जनकत्वेनाङ्कुरसामान्यं प्रति बीजत्वेन हेतुताया अपि विलोपापत्तेः ॥ ४ ॥

ननु धृत्यादीनां प्रयत्नजन्यत्वे किं मानमित्यत्राह ।

कार्य्यत्वान्निरुपाधित्वमेवं धृतिविनाशयोः ।
विच्छेदेन पदस्यापि प्रत्ययादेश्च पूर्व्ववत् ॥ ५ ॥

धृतिविनाशयोः प्रयत्नजन्यत्वान्निरुपाधित्वं विच्छेदेनान्तराप्रलयेन आदर्शाद्यभावात् अर्व्वागदर्शी नाद्यव्यवहारमूलं व्यवहारानभिज्ञत्वादिति सर्गाद्यकालीनघटादिव्यवहारप्रवर्त्तकः पुरुषः

सिद्धतिः । एवं प्रत्ययादेर्वेदजन्यधीप्रामाण्यादेरपि निरुपाधित्वं अथ वा कार्य्यत्वादिकमन्यथा व्याख्यायते । कार्य्यं तात्पर्य्यं तात्पर्य्यविषय एव शब्दप्रामाण्यमिति तात्पर्य्यं हि यस्य वेदे स एवेश्वरः । आयोजनं व्याख्यानं वेदास्तदर्थविद्याख्याताः महाजनपरिगृहीतवाक्यत्वात् अव्याख्यातत्वे पदार्थानवगमेऽननुष्ठानापत्तेः एकदेशदर्शिनश्च व्याख्यायां नाश्वासः एवं धृतिर्धारणं धृत्यादेरिति आदिग्रहणात् अनुष्ठानसंग्रहः एवमीश्वरादिपदार्थतया ईश्वरसिद्धिः । तदुक्तम् उद्देशएव तात्पर्य्यं व्याख्या विश्वदृशः सती । ईश्वरादिपदं सार्थं लोकवृत्तानुसारतः । उद्देश इच्छाविशेषः एवं अहं सर्व्वस्य इत्यादावहं पदं स्वतन्त्रोच्चारयितृपरं लोकस्थले सतात्पर्य्यकशब्दस्यैव प्रमाणत्वात् । य एव लौकिकास्त एव वैदिका इति लौकिकाहमादिपदवदलौकिकेऽपीयमेव व्यवस्था प्रत्ययतः विधिप्रत्ययात् आप्ताभिप्रायो विध्यर्थः यस्याभिप्रायः स एवेश्वरः ॥ ५ ॥

प्रवृत्तिः कृतिरेवात्र साचेच्छातो यतश्च सा ।
तज्ज्ञानं विषयस्तस्य विधिस्तज्ज्ञापकोऽथवा ॥ ६ ॥

विधिजन्यज्ञानात् प्रवृत्तिर्दृश्यते सा इच्छातश्चिकीर्षातः चिकीर्षा च कृतिसाध्यत्वेष्टसाधनताज्ञानात् तज्ज्ञानस्य विषयः कार्य्यत्वं इष्टसाधनत्वञ्च विधिरिति प्राचां मतं स्वमतमाह तज्ज्ञापकोऽथवेति इष्टसाधनत्वानुमापक आप्ताभिप्रायो विधिप्रत्ययार्थः ॥ ६ ॥

प्रवृत्तिप्रयोजकेच्छाहेतुज्ञानविषयं परिशेषयति ।

इष्टहानेरनिष्टाप्तेरप्रवृत्तेर्व्विरोधतः ।
असत्त्वात् प्रत्ययत्यागात् कर्त्तृधर्म्मान सङ्गरात् ॥ ७॥

स्पन्दस्य कर्त्तृधर्म्मस्य प्रवृत्तिप्रयोजकत्वे आत्मानं विश्रामीयादित्यत्राप्रवृत्तिप्रसङ्गात् ग्रामं गच्छतीत्यतः प्रवृत्त्यापत्तेः । यत्नस्य विधित्वे दोषमाह अप्रवृत्तेः आख्यातान्तरेण यत्ने बोधितेऽपीष्ट

साधनत्वाप्रतिसन्धाने अनिष्टसाधनत्वज्ञाने वाऽप्रवृत्तेः इच्छायाविधित्वे दोषमाह विरोधतइति इच्छाया विधित्वे इच्छयैव तज्ज्ञानं जननीयं इच्छाया ज्ञानेन चेच्छा जननीया इत्यन्योन्याश्रयः तदिदमुक्तं विरोधतइति। नन्विच्छाज्ञानं लिङा जननीयं इत्यत्राह असत्त्वादिति इच्छाज्ञाने जाते प्रवृत्तिहेतुस्वरूपसदिच्छाभावात् प्रवृत्तिर्न स्यात् इच्छायाः स्वरूपसत्या एव प्रवृत्तिहेतुत्वात्। नच लिङश्रवणकाले इच्छा स्वरूपसतीत्यर्थः। ननु लिङैव इच्छाजनिका इत्यत्राह प्रत्ययत्यागादिति इच्छाकारणत्वेन गृहीतस्य प्रत्ययस्य ज्ञानस्य कारणस्य त्यागापत्तेः व्यभिचारादित्यर्थः। लिङ्स्मृतिकाले सुखत्वादिप्रकारकधीजन्येच्छा लिङर्थ इत्यत्राह सङ्करादिति इष्टसाधनताज्ञानस्य उपायेच्छाहेतोरवश्यं स्वीकारात् तत्र च कारणान्तराभावात् लिङ पदमेव कारणमतः फलेच्छाज्ञानं न प्रवृत्तिहेतुः तद्विनापि प्रवृत्ति सम्भवात् तथाच सङ्करादिष्टसाधनत्वज्ञानरूपसाधनसहचारत्वात् इच्छाज्ञानस्येच्छाजनकत्वे मानाभावेन तस्य लिङपदजन्यत्वे माना भावाच्चेति ॥ ७ ॥

ननु यत्नज्ञानमेव प्रवर्त्तकमस्तु आख्यातान्तरञ्च न यत्नवाचकं अनुकूलव्यापारमात्र एव आख्यातशक्तेः रथोगच्छतीत्यादौ तथा कल्पनात् तत्राह।

कृताकृतविभागेन कर्तृरूपव्यवस्थया।
यत्न एव कृतिः पूर्व्वा परस्मिन् सैव भावना ॥ ८ ॥

घटः कृतोऽङ्कुरोन कृत इति व्यवहारवत् कुलालादिः कर्त्ता न कारकान्तरमिति कृञ्धात्वर्थोऽपि कृतिः। ननु यत्नपदस्य पर्य्यायता स्यादतआह पूर्व्वेति परस्मिन्नुत्तरकालवर्त्तिनि फले विद्यमाने सैव कृतिरेव पूर्व्वा साधनीभूता भावना फलानुकूलयत्न एवाख्यातार्थः यद्वी फलानुकूलव्यापारधात्वर्थ प्रत्ययजनिका पूर्व्वा परस्मिन् पूर्व्वा-

परीभूतवत्त्वे सति कृतिराख्यातार्थः । तथाच प्रयत्नवत्त्वमनुकूलत्व पूर्व्वापरीभूतवत्त्वमिति त्रयमर्थः ॥ ८ ॥

ननु धातुना यत्नः प्रतीयते आख्यातस्य च अनुकूलव्यापारार्थकत्वम् आक्षेपादेव च यत्नलाभ इत्यत आह ।

भावनैव हि यत्नात्मा सर्व्वाख्यातस्य गोचरः ।
तया विवरणध्रौव्यादाक्षेपानुपपत्तितः ॥ ९ ॥

तया कृत्या तद्वाचकपदेन पचति पाकं करोतीति विवरणात् तत्र शक्तिः अनुकूलव्यापारस्य यत्नानाक्षेपकत्वात् वर्त्तमानपाकानुकूलव्यापारस्याचेतनेऽपि भावात् ओदनमिति कर्म्मपदोत्तरं पचति भुङ्क्ते वेति जिज्ञासा च कर्म्मणः कृतिव्याप्यत्वप्रतिसन्धानेन यथा पचतीत्यनन्तरं कर्म्मादौ जिज्ञासा ॥ ९ ॥

ननु कर्त्तरपि विवरणात् तत्रापि शक्तिराख्यातस्य स्यात् तत्राह ।

आक्षेपलभ्ये संख्येये नाभिधानस्य कल्पना ।
संख्येयमात्रलाभे तु साकाङ्क्षा व्यवस्थितिः ॥ १० ॥

आख्यातवाच्यया संख्यया आश्रयस्य आक्षेपादेव लाभान्न कर्त्तरि शक्तिकल्पना प्रथमान्तपदोपस्थाप्यत्वे सति आख्यातार्थविशेष्यत्वमाक्षेपलभ्यत्वं भुक्त्वा इत्यादौ क्त्वान्तार्थानन्तर्य्यवारणाय विशेष्यदलम् । सुप्यते इत्यादौ वर्त्तमानत्वविशेष्यत्वं स्वापस्यापीति सत्यन्तदलम् । चैत्रस्तण्डुलं पचतीत्यत्र द्वितीयार्थकर्म्मतावरुद्धत्वात् तण्डुलस्य न तत्र भावनाकाङ्क्षेति भावना शुद्धप्रातिपदिकार्थान्वयिनी अतएव यं यं भावनान्वेति तं तं सङ्ख्यापीत्येकपदोपात्तभावनान्वयबलात् कर्त्रादि सङ्ख्याभिधान एव च प्रथमेति एवं कर्म्मापि नाख्यातपदवाच्यम् ॥ १० ॥

नन्वस्तु कर्म्मधर्म्मो विधिस्तत्राह ।

अतिप्रसङ्गान्न फलं नापूर्व्वं तत्त्वहानितः ।
तदलाभान्न कार्य्यञ्च न क्रियाप्यप्रवृत्तितः ॥ ११ ॥

कर्म्म स्वर्गादि तद्धर्म्मः कार्य्यत्वं यदि विधिस्तत्राह अतिप्रसङ्गान्न फलं स्वर्गं कार्य्यत्वज्ञाने ऽसति स्वर्गासाधनेऽपि प्रवृत्त्यापत्तेः यदि कर्म्मापूर्वं तद्धर्म्मः कार्य्यत्वं विध्यर्थस्तत्राह नापूर्व्वं तत्त्वहानितः शाब्दबोधपूर्व्वं नोपस्थितमित्यतएवापूर्व्वं पूर्व्वमुपस्थितौ एव न तत्त्वम्। अनुपस्थितौ च कथं तत्र शक्तिधीः। ननु कार्य्यत्वरूपेण शक्तिधीः शाब्दबोधे तु योग्यतया अपूर्व्वस्य कार्य्यविशेषस्य भानं तत्राह तदलाभान्न कार्य्यञ्चेति नित्यनिषेधापूर्व्वयोरलाभप्रसङ्गात् तत्र फलकामस्य नियोज्यस्याभावात्। यद्वा ननु कार्य्यत्वेनोपलक्षितायामपूर्व्वव्यक्तौ शक्तिग्रहः गन्धवत्त्वेनोपलक्षितायां पृथिवीत्वविशिष्टायां व्यक्तौ पृथिवीपदस्येव इत्यत्राह तदलाभात् अपूर्व्वत्वविशिष्टापूर्व्वव्यक्त्यनुपस्थितेः गन्धवत्त्वेनापि हि पृथिवीत्वविशिष्टस्य स्मरणमनुमानं वा सम्भवति प्रागनुभवात् प्रकृते तथात्वेऽपूर्व्वत्वव्याघातादित्यर्थः। ननु कर्म्म यागादि तद्धर्म्मः कार्य्यत्वविधिरित्यत्राह न क्रियापीति अनिष्टसाधनताधीकाले प्रवृत्त्यदर्शनात्। अत्र अपिना नापूर्व्वमपि उक्तदोषादित्यर्थः ॥ ११ ॥

ननु करणं शब्दः तद्धर्म्मोऽभिधा तज्ज्ञानं प्रवर्त्तकमतएवाहुः अभिधां भावनामाहुरन्यामेव लिङादयः। अर्थात्मभावना त्वन्या सर्वाख्यातस्य गोचरः। अभिधा यागप्रवृत्तिकार्य्यमिति धीः शब्दादाख्याताच्च उपादानादुत्पत्त्यनुकूलक्रियारूपेयमित्यत्राह।

असत्त्वादप्रवृत्तेश्च नाभिधापि गरीयसी।

बाधकस्य समानत्वात् परिशेषोऽपि दुर्लभः ॥ १२ ॥

अभिधायां मानाभावात् अभिधाशब्दतोऽभिधाज्ञाने अप्रवृत्तेः गरीयसी उचिता लिङर्थतयेति शेषः। ननु अन्यस्य लिङर्थत्वे बाधात् परिशेषेणाभिधा लिङर्थ इत्यत्राह बाधकस्येति प्रकृतेऽपि बाधकसम्भवात् ॥ १२ ॥

ननु करणस्य यागादेर्धर्म्मे इष्टसाधनत्वं विध्यर्थोऽस्तु तत्राह।

हेतुत्वादनुमानाच्च मध्यमादौ वियोगतः।

अन्यत्र कॢप्तसामर्थ्यान्निषेधानुपपत्तितः॥ १३॥

विध्यर्थस्य इष्टसाधनताया हेतुत्वात् लिङ्गतोपन्यासात्। नच खस्य खलिङ्गत्वमिति अग्निकामो दारुणी मथ्नीयादित्युक्ते कुत इत्याकाङ्क्षायां वक्तारो वदन्ति यतो दारुद्वयमथनमग्निसाधनमित्यर्थवादादिष्टसाधनताबोधानन्तरमपि विधेरनुमानात् यदि चानुमितेनापि विधिना इष्टसाधनत्वमेव बोध्यं तदा तदनुमानवैयर्थ्यं। तरति मृत्युं तरति ब्रह्महत्यामित्यादौ मृत्युब्रह्महत्यासन्तरणकामोऽश्वमेधेन यजेतेति वाक्यानुमानस्य सर्वसम्मतत्वात् मध्यमादौ वियोगतः मध्यमोत्तमपुरुषलिङ इष्टसाधनतावियोगात् कुर्य्याः कुर्य्यामित्यत्राज्ञादिकं प्रतीयते आज्ञाभिप्राय एव इति प्रथमपुरुषोऽपि इच्छार्थः अन्यत्र कॢप्तसामर्थ्यात् अधीषणार्थे लिङ इच्छावाचकत्वकल्पनात् निषेधानुपपत्तितः न कलञ्जं भक्षयेदित्यत्रेष्टसाधनत्वस्य निषेधस्य बाधितत्वात् बलवदनिष्टाननुबन्धित्वञ्च न विध्यर्थः श्येनेनाभिचरन् इत्यादौ असम्भवात् अप्रवर्त्तमानपुरुषस्य बलवद्द्वेषविषयत्वात् बलवद्द्वेषविषयदुःखजनकत्वसामान्याभावस्य बाधितत्वादिति॥ १३॥

स्वमतमाह।

विधिर्व्वक्तुरभिप्रायः प्रवृत्त्यादौ लिङादिभिः।

अभिधेयोऽनुमेया तु कर्त्तुरिष्टाभ्युपायता॥ १४॥

प्रवृत्तिनिवृत्तिविषय आप्ताभिप्रायः लिङादिभिः प्रत्ययैरभिधेयः इष्टसाधनता त्वनुमेया। वस्तुतस्तु ईश्वरेच्छायाः सर्व्वविषयकत्वात् निषेधविरोधः बलवदनिष्टाननुबन्धित्वेनेच्छायाः शक्यत्वे गौरवमिति प्राचीनमतमेव साधीयः॥ १४॥

अतेरित्यस्य व्याख्यान्तरमाह।

कृत्स्न एव च वेदोऽयं परमेश्वरगोचरः ।
स्वार्थद्वारैव तात्पर्य्यं तस्य स्वर्गादिवद्विधौ ॥ १५ ॥

सर्वत्र वेदभागे ईश्वरः प्रतिपादितः यच्चावै विष्णुः पश्यत्यचक्षुरित्यादिश्रुतिषु अतस्याक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठत इत्यादिषु न तु सिद्धतया अमीषामन्यत्र तात्पर्य्यं यथा स्वर्ग नरकादिबोधकानां तथा ईश्वरमुपासीतेति विधेरेकवाक्यतया तेषां त्वन्मतेऽपि प्रामाण्यमेव अन्यथा स्वर्गादिपदानामपि स्वार्थे प्रामाण्यं न स्यात् तदेतदुक्तं स्वार्थद्वारेवेति स्वार्थप्रतिपादनद्वारा एव विधौ सिद्धार्थतात्पर्य्यात् वाक्याद्वैदिकप्रशंसानिन्दावाक्यानि प्रशंसानिन्दा ज्ञानपूर्व्वकाणि प्रशंसानिन्दावादवाक्यत्वात् परिणतिसुरसमाम्रफलमित्यादिवत् ॥ १५ ॥

संख्याविशेषादित्यस्य व्याख्यान्तरमाह ।

स्यामभूवं भविष्यामीत्यादौ संख्या प्रवक्तृगा ।
समाख्यापि च शाखानां नाद्यप्रवचनादृते ॥ १६ ॥

वैदिकोत्तमपुरुषेण स्वतन्त्रोच्चारयितुः संख्या वाच्या स ऐक्षत एकोऽहं बहु स्यामित्यादि बहुलम् उत्तमपुरुषश्रुतेः । संख्यापदार्थमन्यमाह समाख्येत्यादि सर्वासां शाखानां हि काठककालापकाद्याः संख्याः संख्याविशेषाः श्रूयन्ते ते च नाध्ययनमात्रनिबन्धनाः अध्येतृणामानन्त्यात् अनादावन्यैरपि तदध्ययनात् तस्मादतीन्द्रियार्थदर्शी भगवानेव ईश्वरः कारुणिकः सर्गादावस्मदाद्यदृष्टाकृष्टकाठकादिशरीरविशेषमधिष्ठाय यां यां शाखामुक्तवान् तस्याः शाखाया स्वनाम्ना व्यवदेश इति सिद्धमीश्वरमननं मोक्षहेतुः ॥ १६ ॥

यस्येश्वरे न विश्वासस्तं प्रत्याह ।

इत्येवं श्रुतिनीतिसंप्लवजलैर्भूयोभिराक्षालिते
येषां नास्पदमादधासि हृदये ते शैलसाराशयाः ।

किन्तु प्रस्तुतविप्रतीपविधयोऽप्युच्चैर्भवच्चिन्तकाः
काले कारुणिक त्वयैव कृपया ते तारणीया नराः ॥ १७ ॥

इतिशब्दः स्वरूपे एवंशब्दः प्रकारार्थः शैलसारः लोहमति-कठिनशिला वा । प्रस्तुते ईश्वरे विप्रतीपविधयः प्रतिकूलकराः तादृशा अपि उच्चैरतिशयेन काले भवच्चिन्तकाः शङ्काकलङ्कशून्याः कार्य्याः ॥ १७ ॥

अस्माकन्तु निसर्गसुन्दर चिराच्चेतोनिमग्नं त्वयि
त्यक्तानन्दनिधौ तथापि तरलं नाद्यापि सन्तृप्यते ।
तन्नाथ त्वरितं विधेहि करुणां येन त्वदेकाग्रतां
याते चेतसि नाप्नुवाम शतशोयाम्याः पुनर्यातनाः ॥ १८ ॥

त्यक्ता तनुं सन्तृप्यत इति कर्म्मकर्त्तरि ।

इत्येष नीतिकुसुमाञ्जलिरुज्ज्वलश्री
र्यद्वासयेदपि च दक्षिणवामकौ द्वौ ।
नो वा ततः किममरेशगुरोर्गुरुस्तु
प्रीतोऽस्त्वनेन पदपीठसमर्पणेन ॥ १९ ॥

इति पञ्चमः स्तवकः ।

नो वासयेत्ततः किमस्माकम् ।

इति श्रीहरिदासभट्टाचार्य्यविरचितकुसुमाञ्जलिकारिका
व्याख्यानं समाप्तम् ।

परिभाषा ।

श्रीधर्म्मराजाध्वरीन्द्रविरचिता

गवर्णमेण्टसंस्थापितसंस्कृतपाठशालाध्यक्षमहोदयानामनुज्ञया

संस्कृत यन्त्रे मुद्रिता ।

कलिकाता।

शकाब्दाः १७६९

परिभाषा।

प्रथमः परिच्छेदः।

यदविद्याविलासेन भूतभौतिकसृष्टयः। तं नौमि परमात्मानं सच्चिदानन्दविग्रहम्॥ यदन्तेवासिपञ्चास्यैर्निरस्ताभेदिवारणाः। तं प्रणौमि नृसिंहाख्यं यतीन्द्रं परमं गुरुम्॥ श्रीमद्वेङ्कटनाथाख्यान् वेलाङ्गुडिनिवासिनः। जगद्गुरूनहं वन्दे सर्व्वतन्त्रप्रवर्त्तकान्॥ ब्रह्म बोधाय मन्दानां वेदान्तार्थावलम्बिनी। धर्म्मराजाध्वरीन्द्रेण परिभाषा वितन्यते॥

इह खलु धर्म्मार्थकाममोक्षाख्येषु चतुर्व्विधपुरुषार्थेषु मोक्षएव परमपुरुषार्थः न स पुनरावर्त्तते इत्यादि श्रुत्या तस्यैव नित्यत्वावगमात् इतरेषां त्रयाणां प्रत्यक्षेण तद्यथेह कर्म्मचितोलोकः क्षीयते एव-मेवामुत्र पुण्यचितोलोकः क्षीयतइत्यादिश्रुत्या चानित्यत्वावगमाच्च। स च ब्रह्मज्ञानादिति ब्रह्म तज्ज्ञानं तत्प्रमाणञ्च सप्रपञ्चं निरूप्यते।

तत्र प्रमायाः करणं प्रमाणम्। तत्र स्मृतिव्यावृत्तं प्रमात्वमनधिगतावाधितार्थविषयज्ञानत्वं स्मृतिसाधारणन्तु अवाधितार्थविषयज्ञानत्वम्। नीरूपस्यापि कालस्य इन्द्रियवेद्यत्वाभ्युपगमेन धारावाहिक

बुद्धेरपि पूर्व्वपूर्व्वज्ञानाविषयतत्तत्क्षणविशेषविषयकत्वेन न तत्राव्याप्तिः। किञ्च सिद्धान्ते धारावाहिकबुद्धिस्थले न ज्ञानभेदः किन्तु यावद्घटस्फुरणं तावद्घटाकारान्तःकरणवृत्तिरेकैव नतु नाना वृत्तेः स्वविरोधिवृत्त्युत्पत्तिपर्य्यन्तस्थायित्वाभ्युपगमात् तथाच तत्प्रतिफलितचैतन्यरूपं घटादिज्ञानमपि तत्र तावत्कालीनमेकमेवेति नाव्याप्तिशङ्कापि ।

ननु सिद्धान्ते घटादेर्मिथ्यात्वेन वाधितत्वात् कथं तज्ज्ञानं प्रमा । उच्यते । ब्रह्मसाक्षात्कारानन्तरं हि घटादीनां वाधः यत्र त्वस्य सर्व्वमात्मैवाभूत् तत् केन कं पश्येत् इति श्रुतेः । नतु संसारदशायां वाधः यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीति श्रुतेः । तथाचाबाधितपदेन संसारदशायामवाधितत्वं विवक्षितमिति घटादिप्रमायां नाव्याप्तिः । तदुक्तम् । देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः । लौकिकं तद्वदेवेदं प्रमाणन्त्वात्मनिश्चयादिति । आ आत्मनिश्चयात् ब्रह्मसाक्षात्कारपर्य्यन्तमित्यर्थः । लौकिकमिति घटादिज्ञानमित्यर्थः ।

तानि च प्रमाणानि षट् । प्रत्यक्षानुमानोपमानागमार्थापत्त्यनुपलब्धिभेदात् । तत्र प्रत्यक्षप्रमायाः करणं प्रत्यक्षप्रमाणम् । प्रत्यक्षप्रमा चात्र चैतन्यमेव यत्साक्षादपरोक्षाद्ब्रह्म इति श्रुतेः । अपरोक्षादित्यस्य अपरोक्षमित्यर्थः ।

ननु चैतन्यमनादि तत्कथं चक्षुरादेस्तत्करणत्वेन प्रमाणत्वमिति । उच्यते । चैतन्यस्यानादित्वेऽपि तदभिव्यञ्जकान्तःकरणवृत्तिरिन्द्रियसन्निकर्षादिना जायते इति वृत्तिविशिष्टं चैतन्यमादिमदित्युच्यते । ज्ञानावच्छेदकत्वाच्च वृत्तौ ज्ञानत्वोपचारः तदुक्तं विवरणे अन्तःकरणवृत्तौ ज्ञानत्वोपचारादिति ।

ननु निरवयवस्यान्तःकरणस्य परिणामात्मिका वृत्तिः कथं इत्थं

न तावदन्तःकरणं निरवयवं सादिद्रव्यत्वेन सावयवत्वात् सादित्वञ्च तन्मनोऽसृजत इति श्रुतेः। वृत्तिरूपज्ञानस्य मनोधर्म्मत्वे च कामः सङ्कल्पोविचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरेतत्सर्व्वं मन एवेति श्रुतिः प्रमाणम्। धीशब्देन वृत्तिरूपज्ञानाभिधानात् अतएव कामादेरपि मनोधर्म्मत्वम्।

ननु कामादेरन्तःकरणधर्म्मत्वे अहमिच्छामि अहं बिभेमि अहं जानामीत्याद्यनुभवः आत्मधर्म्मत्वमवगाहमानः कथमुपपद्यते। उच्यते। अयःपिण्डस्य दग्धृत्वाभावेऽपि दग्धृत्वाश्रयवह्नितादात्म्याध्यासात् यथा अयोदहतीति व्यवहारः तथा सुखाद्याकारपरिणाम्यन्तःकरणैक्याध्यासादहं सुखी अहं दुःखीत्यादिव्यवहारः।

ननु अन्तःकरणस्य इन्द्रियतया अतीन्द्रियत्वात् कथं प्रत्यक्षविषयतेति। उच्यते। न तावदन्तःकरणमिन्द्रियमित्यत्र मानमस्ति। मनः षष्ठानीन्द्रियाणीति भगवद्गीतावचनं प्रमाणमितिचेत् न अनिन्द्रियेणापि मनसा षट्त्वसंख्यापूरणाविरोधात्। नहि इन्द्रियगतसंख्यापूरणमिन्द्रियेणैव इति नियमः यजमानपञ्चमा इडां भक्षयन्तीत्यत्र ऋत्विग्गत पञ्चत्वसंख्याया अनृत्विजापि यजमानेन वेदानध्यापयामास महाभारत पञ्चमानित्यादौ च वेदगतपञ्चत्वसंख्यायाः अवेदेनापि भारतेन पूरणदर्शनात् इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः इत्यादिश्रुत्या मनसोऽनिन्द्रियत्वावगमाच्च। नचैवं मनसोऽनिन्द्रियत्वे सुखादिप्रत्यक्षस्य साक्षात्त्वं न स्यादिन्द्रियाजन्यत्वादिति वाच्यं नहि इन्द्रियजन्यत्वेन ज्ञानस्य साक्षात्त्वं अनुमित्यादेरपि मनोजन्यतया साक्षात्त्वापत्तेः ईश्वर ज्ञानस्याजन्यस्य साक्षात्त्वानापत्तेश्च।

सिद्धान्ते प्रत्यक्षत्वप्रयोजकं किमिति चेत् किं ज्ञानगतस्य प्रत्यक्षत्वस्य प्रयोजकं पृच्छसि किम्बा विषयगतस्य। आद्ये प्रमाणचैतन्यस्य

विषयावच्छिन्नचैतन्याभेद इति ब्रूमः। तथाहि त्रिविधं चैतन्यं विषयचैतन्यं प्रमाणचैतन्यं प्रमातृचैतन्यञ्चेति। तत्र घटाद्यवच्छिन्नं चैतन्यं विषयचैतन्यं अन्तःकरणवृत्त्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यं अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम्। यथा तड़ागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते। स एव परिणामो वृत्तिरित्युच्यते। अनुमित्यादिस्थले तु अन्तःकरणस्य न वह्न्यादिदेशगमनं वह्न्यादेश्चक्षुराद्यसन्निकर्षात् तथाचायं घट इत्यादिप्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहिरेकत्र देशे समवस्थानात् तदुभयावच्छिन्नं चैतन्यमेकमेव विभाजकयोरप्यन्तःकरणवृत्तिघटादिविषययोरेकदेशस्थितत्वेन भेदाजनकत्वात्। अतएव मठान्तर्व्वर्त्तिघटावच्छिन्नाकाशो न मठाकाशाद्भिद्यते। तथा चायं घट इति प्रत्यक्षस्थले घटाकारवृत्तेर्घटसंयोगितया घटावच्छिन्नचैतन्यात्तद्वृत्त्यवच्छिन्नचैतन्यस्याभिन्नतया तत्र घटज्ञानस्य घटांशे प्रत्यक्षत्वं सुखाद्यवच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्य च नियमेनैकदेशस्थितोपाधिद्वयावच्छिन्नत्वान्नियमेनाहं सुखीत्यादिज्ञानस्य सुखाद्यंशे प्रत्यक्षत्वम्।

नन्वेवं स्ववृत्तिसुखादिस्मरणस्यापि सुखाद्यंशे प्रत्यक्षत्वापत्तिरिति चेन्न तत्र स्मर्य्यमाणसुखस्यातीतत्वेन स्मृतिरूपान्तःकरणवृत्तेर्व्वर्त्तमानतया उपाध्योर्व्विभिन्नकालत्वेन तत्तदवच्छिन्नचैतन्ययोर्भेदात् उपाध्योरेकदेशस्थत्वे सति एककालीनत्वस्यैव उपाधेयाभेदप्रयोजकत्वात्। यदि च एकदेशस्थत्वमात्रमुपाधेयाभेदप्रयोजकं तदा अहं पूर्व्वं सुखीत्यादिस्मृतावतिव्याप्तिवारणाय वर्त्तमानत्वं विषयविशेषणं देयम्।

नन्वेवमपि स्वकीयधर्म्माधर्म्मौ वर्त्तमानौ यदा शब्दादिना ज्ञायेते

तदा तादृशशाब्दज्ञानादावतिव्याप्तिः तत्र धर्म्माद्यवच्छिन्नतद्वृत्त्यवच्छिन्न चैतन्ययोरेकत्वात् इति चेन्न योग्यत्वस्यापि विषयविशेषणत्वात्। अन्तःकरणधर्म्मत्वाविशेषेऽपि किञ्चिद्योग्यं किञ्चिदयोग्यं इत्यत्र फल बलकल्प्यः स्वभावएव शरणम्। अन्यथा न्यायमतेऽप्यात्मधर्म्मत्वात् सुखादिवद्धर्म्मादेः प्रत्यक्षत्वापत्तिर्दुर्वारा।

नचैवमपि वर्त्तमानतादशायां त्वं सुखीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वापत्तिः स्यादिति वाच्यम्। इष्टत्वात्। दशमस्त्वमसीत्यादौ सन्निकृष्टविषये शब्दादप्यपरोक्षज्ञानाभ्युपगमात्। अतएव पर्व्वतो वह्निमान् इत्यादिज्ञानमपि वह्न्यंशे परोक्षं पर्वतांशेऽपरोक्षं पर्व्वताद्यवच्छिन्नचैतन्यस्य बहिर्निःसृतान्तःकरणवृत्त्यवच्छिन्नचैतन्याभेदात्। वह्न्यंशे तु अन्तःकरणवृत्तिनिर्गमनाभावेन वह्न्यवच्छिन्नचैतन्यस्य अन्तःकरणवृत्त्यवच्छिन्नचैतन्यस्य च परस्परं भेदात्। तथा चानुभवः पर्व्वतं पश्यामि वह्निमनुमिनोमीति। न्यायमते तु पर्व्वतमनुमिनोमीत्यनुव्यवसायापत्तिः। असन्निकृष्टपक्षकानुमितौ तु सर्व्वांशेऽपि ज्ञानं परोक्षम्। सुरभि चन्दनमित्यादि ज्ञानमपि चन्दनखण्डांशेऽपरोक्षं सौरभांशे च परोक्षं सौरभस्य चक्षुरिन्द्रियायोग्यतया योग्यत्वघटितस्य निरुक्तलक्षणस्याभावात्।

नचैवमेकत्र ज्ञाने परोक्षत्वापरक्षत्वयोरभ्युपगमे तयोर्ज्जातित्वं न स्यादिति वाच्यम्। इष्टत्वात्। जातित्वोपाधित्वपरिभाषायाः सकल प्रमाणागोचरत्वेनाप्रामाणिकत्वात्। घटोऽयमित्यादि प्रत्यक्षं हि घटत्वादिसद्भावे मानं नतु तस्य जातित्वेऽपि जातित्वरूपसाध्यस्या प्रसिद्धौ तत्साध्यकानुमानस्याप्यनवकाशात् समवायासिद्ध्या ब्रह्मभिन्न निखिलप्रपञ्चस्यानित्यतया च नित्यसमवेतत्वघटितजातित्वस्य घटत्वादावसिद्धेश्च। एवमेवोपाधित्वं निरसनीयम्। पर्व्वतोवह्निमानित्यादौ

च पर्व्वतांशे वह्न्यंशे चान्तःकरणवृत्तिभेदाङ्गीकारेण तत्तद्वृत्त्यवच्छेदकभेदेन परोक्षत्वापरोक्षत्वयोरेकत्र चैतन्ये न विरोधः। तथाच तत्तदिन्द्रिययोग्यवर्त्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तदाकारवृत्त्यवच्छिन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वम्। घटादेर्व्विषयस्य प्रत्यक्षत्वन्तु प्रमात्रभिन्नत्वम्।

ननु कथं घटादेरन्तःकरणावच्छिन्नचैतन्याभेदः अहमिदं पश्यामीति भेदानुभवविरोधादिति चेत्। उच्यते। प्रमात्रभेदो नाम न तावदैक्यं किन्तु प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः। तथाहि घटादेः स्वावच्छिन्नचैतन्येऽध्यस्ततया विषयचैतन्यसत्तैव घटादिसत्ता अधिष्ठानसत्तातिरिक्तारोपितसत्ताया अनङ्गीकारात्। विषयचैतन्यञ्च पूर्व्वोक्तप्रकारेण प्रमातृचैतन्यमेवेति प्रमातृचैतन्यस्यैव घटाद्यधिष्ठानतया प्रमातृसत्तैव घटादिसत्ता नान्येति सिद्धम् घटादेरपरोक्षत्वम्। अनुमित्यादिस्थलेऽन्तःकरणस्य वह्न्यादिदेशनिर्गमनाभावेन वह्न्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्यानात्मकतया वह्न्यादिसत्ता प्रमातृसत्तातो भिन्नेति नातिव्याप्तिः।

नन्वेवमपि धर्म्माधर्म्मादिगोचरानुमित्यादिस्थले धर्म्माधर्म्मयोः प्रत्यक्षत्वापत्तिः। धर्म्माद्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्याभिन्नतया धर्म्मादिसत्तायाः प्रमातृसत्तानतिरेकादिति चेन्न योग्यत्वस्यापि विषयविशेषणत्वात्।

नन्वेवमपि रूपी घटइति प्रत्यक्षस्थले घटगतपरिमाणादेः प्रत्यक्षत्वापत्तिः रूपाद्यवच्छिन्नचैतन्यस्य परिमाणाद्यवच्छिन्नचैतन्यस्य च एकतया रूपाद्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेदेन परिमाणाद्यवच्छिन्नचैतन्यस्यापि प्रमात्रभिन्नतया परिमाणसत्तायाः प्रमातृसत्तातिरिक्तत्वाभावादितिचेन्न तत्तदाकारवृत्त्युपहितत्वस्यापि प्रमातृविशे-

मणत्वात्। रूपाकारवृत्तिदशायां परिमाणाकारवृत्त्यभावेन परिमाणाकारवृत्त्युपहितप्रमातृचैतन्याभिन्नसत्ताकत्वाभावेनातिव्याप्त्यभावात्।

नन्वेवं वृत्तावव्याप्तिः अनवस्था,भया वृत्तिगोचरवृत्त्यनङ्गीकारेण तत्र स्वाकारवृत्त्युपहितत्वघटितोक्तलक्षणाभावादिति चेन्न अनवस्था भिया वृत्तेर्वृत्त्यन्तराविषयत्वेऽपि स्वविषयत्वाभ्युपगमेन स्वविषय वृत्त्युपहितप्रमातृचैतन्याभिन्नसत्ताकत्वस्य तत्रापि सम्भवात्। एवञ्चान्तःकरणतद्धर्म्मादीनां केवलसाक्षिविषयत्वेऽपि तत्तदाकारवृत्त्यभ्युपगमेन उक्तलक्षणस्य तत्रापि सत्त्वान्नाव्याप्तिः।

नचान्तःकरणतद्धर्म्मादीनां वृत्तिविषयत्वाभ्युपगमे केवलसाक्षि विषयत्वाभ्युपगमविरोधइति वाच्यम् नहि वृत्तिं विना साक्षिविषयत्वं केवलसाक्षिवेद्यत्वं किन्तु इन्द्रियानुमानादिप्रमाणमन्तरेण साक्षिविषयत्वम्। अतएवाहङ्कारटीकायामाचार्य्यैरहमाकारान्तःकरणवृत्तिरङ्गीकृता। अतएव प्रातिभासिकरजतस्थले रजताकारा अविद्यावृत्तिः साम्प्रदायिकैरङ्गीकृता। तथाचान्तःकरणतद्धर्म्मादिषु केवल साक्षिवेद्येषु वृत्त्युपहितत्वघटितलक्षणस्य सत्त्वान्नाव्याप्तिः।

तदयं निर्गलितार्थः। स्वाकारवृत्त्युपहितप्रमातृचैतन्यसत्तातिरिक्तसत्ताकत्वशून्यत्वे सति योग्यत्वं विषयस्य प्रत्यक्षत्वम्। तत्र संयोगसंयुक्ततादात्म्यादीनां सन्निकर्षाणां चैतन्याभिव्यञ्जकवृत्तिजनने विनियोगः।

सा च वृत्तिश्चतुर्व्विधा संशयो निश्चयो गर्व्वः स्मरणमिति। एवं वृत्तिभेदेन एकमप्यन्तःकरणं मनइति बुद्धिरित्यहङ्कारइति चित्तमिति चाख्यायते। तदुक्तम्। मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम्। संशयोनिश्चयोगर्व्वः स्मरणं विषया इमे।

तच्च प्रत्यक्षं द्विविधं सविकल्पकनिर्व्विकल्पकभेदात्। तत्र सवि-

कल्पकं वैशिष्ट्यावगाहि ज्ञानं यथा घटमहं जानामीत्यादि ज्ञानम् । निर्व्विकल्पकन्तु संसर्गानवगाहि ज्ञानम् । यथा सोऽयं देवदत्तः तत्त्वमसीत्यादिवाक्यजन्यं ज्ञानम् ।

ननु शाब्दमिदं ज्ञानं न प्रत्यक्षं इन्द्रियाजन्यत्वादिति चेन्न नहि इन्द्रियजन्यत्वं प्रत्यक्षत्वे तन्त्रं दूषितत्वात् किन्तु योग्यवर्त्तमानविषयत्वे सति प्रमातृचैतन्यस्य विषयचैतन्याभिन्नत्वमित्युक्तम् । तथा च सोऽयं देवदत्त इतिवाक्यजन्यज्ञानस्य सन्निकृष्टविषयतया वहिर्निःसृतान्तःकरणवृत्त्यभ्युपगमेन देवदत्तावच्छिन्नचैतन्यस्य वृत्त्यवच्छिन्नचैतन्याभिन्नतया सोऽयं देवदत्त इतिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वम् । एवं तत्त्वमसीत्यादिवाक्यजन्यज्ञानस्यापि । तत्र प्रमातुरेव विषयतया तदुभयाभेदस्य सत्त्वात् ।

ननु वाक्यजन्यज्ञानस्य पदार्थसंसर्गावगाहितया कथं निर्व्विकल्पकत्वम् । उच्यते । वाक्यजन्यज्ञानविषयत्व हि न पदार्थसंसर्गत्वं तन्त्रं अनभिमतसंसर्गस्यापि वाक्यजन्यज्ञानविषयतापत्तेः किन्तु तात्पर्य्यविषयत्वम् । प्रकृते च सदेव सौम्येदमग्र आसीत् इत्युपक्रम्य तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इत्युपसंहारेण विशुद्धे ब्रह्मणि वेदान्तानां तात्पर्य्यमवसितमिति कथं तात्पर्य्याविषयं संसर्गमवबोधयेत् ।

इदमेव तत्त्वमसीत्यादिवाक्यानामखण्डार्थत्वं यत्संसर्गानवगाहियथार्थज्ञानजनकत्वमिति । तदुक्तम् । संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम् । उक्ताखण्डार्थता यद्वा तत्प्रातिपदिकार्थता । प्रातिपदिकार्थमात्रपरत्वं वा अखण्डार्थत्वमिति चतुर्थपादार्थः ।

तच्च प्रत्यक्षं पुनर्द्विविधं जीवसाक्षीश्वरसाक्षी चेति । तत्र जीवो नाम अन्तःकरणावच्छिन्नं चैतन्यं तत्साक्षी तु अन्तःकरणोपहितं चैतन्यम् । अन्तःकरणस्य विशेषणत्वोपाधित्वाभ्यामनयोर्भेदः । विशे-

यश्च कार्य्यान्वयि उपाधिश्च कार्य्यानन्वयी व्यावर्त्तको वर्त्तमानश्च रूपविशिष्टो घटोऽनित्य इत्यत्र रूपं विशेषणं कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रमित्यत्र कर्णशष्कुल्युपाधिः। अयमेवोपाधिर्नैयायिकैः परिच्छायक इत्युच्यते। प्रकृते चान्तःकरणस्य जड़तया विषयभासकत्वायोगेन विषयभासकचैतन्योपाधित्वम्। अयञ्च जीवसाक्षी प्रत्यात्मं नाना एकत्वे तु चैत्रावगते मैत्रस्याप्यनुसन्धानप्रसङ्गः।

ईश्वरसाक्षी तु मायोपहितं चैतन्यं तच्चैकं तदुपाधिभूतमायाया एकत्वात् इन्द्रो मायाभिः पुरुरूप ईयत इत्यादिश्रुतौ मायाभिरिति बहुवचनस्य मायागतशक्तिविशेषाभिप्रायतया मायागतसत्त्वरजस्तमोरूपगुणाभिप्रायतया चोपपत्तिः। मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्। तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते। योगी मायाममेयाय तस्मै विद्यात्मने नमः। अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाम्। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः इत्यादिश्रुतिषु एकवचनेन लाघवानुगृहीतेन मायाया एकत्वं निश्चीयते। ततश्च तदुपहितं चैतन्यमीश्वरसाक्षी तच्चानादि तदुपाधेर्मायाया अनादित्वात्। मायावच्छिन्नं चैतन्यञ्च परमेश्वरः मायाया विशेषणत्वे ईश्वरत्वं उपाधित्वे साक्षित्वं इतीश्वरत्वसाक्षित्वयोर्भेदः न तु धर्म्मिणोरीश्वरतत्साक्षिणोः।

स च परमेश्वर एकोऽपि स्वोपाधिभूतमायानिष्ठसत्त्वरजस्तमोगुणभेदेन ब्रह्मविष्णुमहेश्वरादिशब्दवाच्यतां भजते।

नन्वीश्वरसाक्षिणोरनादित्वे तदैक्षत बहु स्यां प्रजायेय इत्यादौ सृष्टिपूर्व्वसमये परमेश्वरस्यागन्तुकमीक्षणमुच्यमानं कथमुपपद्यते। उच्यते। यथा विषयेन्द्रियसन्निकर्षादिकारणवशेन जीवोपाध्यन्तःकरणस्य वृत्तिभेदा जायन्ते तथा सृज्यमानप्राणिकर्म्मवशेन परमे-

स्वरूपोपाधिभूतमायाया वृत्तिविशेषाः इदमिदानीं स्रष्टव्यमिदमिदानीं पालयितव्यमिदमिदानीं संहर्त्तव्यमित्याद्याकारा जायन्ते तासाञ्च वृत्तीनां सादित्वेन तत्प्रतिविम्बितचैतन्यमपि सादीत्युच्यते ।

एवं साक्षिद्वैविध्येन प्रत्यक्षज्ञानद्वैविध्यं प्रत्यक्षत्वञ्च ज्ञेयगतं ज्ञप्तिगतञ्च निरूपितम् । तत्र ज्ञप्तिगतप्रत्यक्षत्वस्य सामान्यलक्षणं चित्त्वमेव पर्व्वतोवह्निमानित्यादावपि वह्न्याद्याकारवृत्त्युपहितचैतन्यस्य स्वात्मांशे स्वप्रकाशतया प्रत्यक्षत्वात् तत्तद्विषयांशप्रत्यक्षत्वन्तु पूर्व्वोक्तमेव तस्य च भ्रान्तिरूपप्रत्यक्षे नातिव्याप्तिः भ्रमप्रमासाधारण प्रत्यक्षत्वसामान्यनिर्व्वचने तस्यापि लक्ष्यत्वात् । यदा तु प्रत्यक्ष प्रमाया एव लक्षणं वक्तव्यं तदा पूर्व्वोक्तलक्षणेऽवाधितत्वं विषय विशेषणं देयं शुक्तिरूप्यादिभ्रमस्य संसारकालीनवाधविषयप्रातिभासिकरजतादिविषयकत्वात् ।

ननु विसम्वादिप्रवृत्त्या भ्रान्तिज्ञानस्य विषयसिद्धावपि तस्य प्रातिभासिकतत्कालोत्पन्नरजतादिविषयकत्वे न प्रमाणं देशान्तरीय रजतस्य ज्ञानस्यैव तद्विषयत्वसम्भवादिति चेन्न तस्यासन्निकृष्टतया प्रत्यक्षविषयत्वायोगात् । न च ज्ञानं तत्र प्रत्यासत्तिः ज्ञानस्य प्रत्यासत्तित्वे ततएव वह्न्यादेः प्रत्यक्षत्वापत्तौ अनुमानाद्युच्छेदापत्तेः ।

ननु रजतोत्पादकानां रजतावयवादीनामभावे शुक्तौ तवापि कथं रजतमुत्पद्यते इति चेत् । उच्यते । नहि लोकसिद्धसामग्री प्रातिभासिकरजतोत्पादिका किन्तु विलक्षणैव तथाहि काचादि दोषदूषितलोचनस्य पुरोवर्त्तिद्रव्यसंयोगादिदमाकारा चाकचक्याकारा च काचिदन्तःकरणवृत्तिरुदेति । तस्याञ्च वृत्तौ इदमवच्छिन्न चैतन्यं प्रतिविम्बते तत्र पूर्व्वोक्तरीत्या वृत्तेर्निर्गमनेन इदमवच्छिन्न चैतन्यं वृत्त्यवच्छिन्नचैतन्यं प्रमातृचैतन्यं चाभिन्नं भवति ततश्च प्रमातृ

चैतन्याभिन्नविषयचैतन्यनिष्ठा शुक्तित्वप्रकारिका अविद्या चाकचक्यादिसादृश्यसन्दर्शनसमुद्बोधितरजतसंस्कारसध्रीचीना काचादिदोषसमवहिता रजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च परिणमते। परिणामो नाम उपादानसमसत्ताककार्य्यापत्तिः। विवर्त्तो नाम उपादानविषमसत्ताककार्य्यापत्तिः। प्रातिभासिकरजतस्याविद्यापेक्षया परिणाम इति चैतन्यापेक्षया विवर्त्त इति चोच्यते। अविद्यापरिणामरूपञ्च तद्रजतमविद्याधिष्ठाने इदमवच्छिन्नचैतन्ये वर्त्तते अस्मन्मते सर्व्वस्यापि कार्य्यस्य स्वोपादानाविद्याधिष्ठानाश्रितत्वनियमात्।

ननु चैतन्यनिष्ठरजतस्य कथमिदं रजतमिति पुरोवर्त्तिना तादात्म्यम्। उच्यते। यथा न्यायमते आत्मनिष्ठस्य सुखादेः शरीरनिष्ठत्वेनोपलम्भः शरीरस्य सुखाद्यधिकरणतावच्छेदकत्वात् तथा चैतन्यमात्रस्य रजतं प्रत्यनधिष्ठानतया इदमवच्छिन्नचैतन्यस्य तदधिष्ठानत्वेन इदमवच्छेदकतया रजतस्य पुरोवर्त्तिना संसर्गप्रत्यय उपपद्यते। तस्य च विषयचैतन्यस्य तदन्तःकरणोपहितचैतन्याभिन्नतया विषयचैतन्येऽध्यस्तमपि रजतं साक्षिण्यध्यस्तं केवलसाक्षिवेद्यं सुखादिवदनन्यवेद्यमिति चोच्यते।

ननु साक्षिण्यध्यस्तत्वे अहं रजतमिति तद्वानिति वा प्रत्ययः स्यादहं सुखीतिवदिति चेत्। उच्यते। नहि सुखादीनामन्तःकरणावच्छिन्नचैतन्यनिष्ठाविद्याकार्य्यत्वप्रयुक्तमहं सुखीतिज्ञानं सुखादीनां घटादिवत् शुद्धचैतन्येऽप्यध्यासात्। किन्तु यस्य यदाकारानुभवाहितसंस्कारसहकृताविद्याकार्य्यत्वं तस्य तदाकारानुभवविषयत्वमित्येकानुगतं नियामकम्। तथा च इदमाकारानुभवाहितसंस्कारसहिताविद्याकार्य्यत्वात् घटादेरिदमाकारानुभवविषयत्वं अहमाका-

रानुभवाहितसंस्कारसहकृताविद्याकार्य्यत्वादन्तःकरणादेरहमनुभव विषयत्वम्। शरीरेन्द्रियादेरुभयविधानुभवसंस्कारसहिताविद्याकार्य्य त्वादुभयविधानुभवविषयत्वम्। तथाचोभयविधानुभवः इदं शरीरम् अहं देहः अहं मनुष्यः अहं ब्राह्मणः इदं चक्षुः अहं काणः इदं श्रोत्रम् अहं वधिरइति। प्रकृते च प्रातिभासिकरजतस्य प्रमातृचैतन्या भिन्नेदमवच्छिन्नचैतन्यनिष्ठाविद्याकार्य्यत्वेऽपि इदं रजतमिति सत्य स्थलीये इदमाकारानुभवाहितसंस्काररजनकत्वात् इदमाकारानुभव विषयता नत्वहं रजतमित्यहमाकारानुभवविषयतेत्यनुसन्धेयम्।

नन्वेवमपि मिथ्यारजतस्य साक्षात्साक्षिसम्बन्धितया भानसम्भवे रजतगोचरज्ञानाभासरूपाया अविद्यावृत्तेरभ्युपगमः किमर्थमिति चेत्। उच्यते। स्वगोचरवृत्त्युपहितचैतन्याभिन्नसत्ताकत्वाभावस्य विषयापरोक्षत्वरूपतया रजतस्यापरोक्षत्वसिद्धये तदभ्युपगमात्। नन्विदंवृत्तेरजताकारवृत्तेश्च प्रत्येकमेकैकविषयत्वे गुरुमतवद्विशिष्ट ज्ञानानभ्युपगमे कुतोभ्रमज्ञानसिद्धिरितिचेन्न वृत्तिद्वयप्रतिविम्बित चैतन्यस्यैकस्य सत्यमिथ्यावस्तुतादात्म्यावगाहित्वेन भ्रमत्वस्वीकारात्। अतएव साक्षिज्ञानस्य सत्यासत्यविषयतयाप्रामाण्यानियमादप्रामा-ण्योक्तिः साम्प्रदायिकानाम्।

ननु सिद्धान्ते देशान्तरीयरजतमप्यविद्याकार्य्यमध्यस्तञ्चेति कथं शुक्तिरूप्यस्य ततोवैलक्षण्यमितिचेन्न त्वन्मते सत्यत्वाविशेषेऽपि केषा-ञ्चित् क्षणिकत्वं केषाञ्चित् स्थायित्वमित्यत्र यदेव नियामकं तदेव स्वभावविशेषादिकं ममापि। यद्वा घटाद्यध्यासेऽविद्यैव दोषत्वेनापि हेतुः। शुक्तिरूप्याध्यासे तु काचादयोदोषाः। तथाचागन्तुक दोषजन्यत्वं प्रातिभासिकत्वे प्रयोजकम्। अतएव स्वप्नोपलब्धरथा दीनामागन्तुकनिद्रादोषजन्यत्वात् प्रातिभासिकत्वम्।

ननु स्वप्नस्थले पूर्व्वानुभूतरथादेः स्मरणमात्रेणैव व्यवहारोपपत्तौ न रथादिसृष्टिकल्पनं गौरवादिति चेन्न रथादेः स्मृतिमात्राभ्युपगमे रथं पश्यामि स्वप्ने रथमद्राक्षमित्याद्यनुभवविरोधापत्तेः अथ रथान् रथयोगान् पथः सृजत इति रथादिसृष्टिप्रतिपादकश्रुतिविरोधापत्तेश्च। तस्मात् शुक्तिरूप्यवत् स्वप्नोपलब्धरथादयोऽपि प्रातिभासिका यावत्प्रतिभासमवतिष्ठन्ते।

ननु स्वप्ने रथाद्यधिष्ठानतयोपलभ्यमानदेशविशेषस्यापि तदा असन्निहिततया अनिर्व्वचनीयप्रातिभासिकदेशोऽभ्युपगन्तव्यः तथाच रथाद्यध्यासः कुत्रेति चेन्न चैतन्यस्य स्वयंप्रकाशस्य रथाद्यधिष्ठानत्वात् प्रतीयमानरथादिरस्तीत्येव प्रतीयते इति सद्रूपेण प्रकाशमानं चैतन्यमेवाधिष्ठानं देशविशेषोऽपि चिदध्यस्तः प्रातिभासिकोरथादाविन्द्रियग्राह्यत्वमपि प्रातिभासिकं तदा सर्व्वेन्द्रियाणामुपरमात्। अहं रथइत्यादिप्रतीत्यापादनन्तु पूर्व्ववन्निरसनीयम्। स्वप्ने रथादयः साक्षान्मायापरिणामाइति केचित्। अन्तःकरणद्वारा तत्परिणामा इत्यन्ये।

ननु रथादेः शुद्धचैतन्याध्यस्तत्वे इदानीं तत्साक्षात्काराभावेन जागरणेऽपि स्वप्नोपलब्धरथादयोऽनुवर्त्तेरन्। उच्यते। कार्य्यविनाशोहि द्विविधः। कश्चिदुपादानेन सह कश्चित्तु विद्यमानएवोपादाने। आद्योबाधः द्वितीयस्तु निवृत्तिः आद्यस्य कारणमधिष्ठानतत्त्वसाक्षात्कारस्तेन विनोपादानभूताया अविद्याया अनिवृत्तेः। द्वितीयस्य कारणं विरोधिवृत्त्युत्पत्तिर्द्दोषनिवृत्तिर्व्वा। तदिह ब्रह्मसाक्षात्काराभावात् स्वप्नप्रपञ्चो मा बाधिष्ट मुषलप्रहारेण घटादेरिव विरोधिप्रत्ययान्तरोदयेन स्वप्नजनकीभूतनिद्रादिदोषनाशेन वा रथादि निवृत्तौ कोविरोधः। एवञ्च शुक्तिरूप्यस्य शुक्त्यवच्छिन्नचैतन्य

निष्ठाविद्याकार्य्यत्वपक्षे शुक्तिरितिज्ञानेन तदज्ञानेन सह रजतस्य बाधः। मूलाविद्याकार्य्यत्वपक्षे तु मूलाविद्याया ब्रह्मसाक्षात्कार निवर्त्त्यतया शुक्तितत्त्वज्ञाननिवर्त्त्यतया रजतस्य तत्र शुक्तिज्ञानान्निवृत्तिमात्रं मुषलप्रहारेण घटस्येव।

ननु शुक्तौ रजतस्य प्रतिभाससमये सत्त्वाभ्युपगमे नेदं रजतमिति त्रैकालिकनिषेधज्ञानं न स्यात् किन्तु इदानीं न रजतमिति स्यात् इदानीं घटः श्यामो नेतिवदितिचेन्न नहि तत्र रजतत्वावच्छिन्न प्रतियोगिकाभावो निषेधविषयः किन्तु लौकिकत्वपारमार्थिकत्वावच्छिन्नप्रातिभासिकरजतप्रतियोगिकः व्यधिकरणधर्म्मावच्छिन्न प्रतियोगिभावाभ्युपगमात्।

ननु प्रातिभासिके रजते पारमार्थिकत्वमवगतं न वा अनवगते प्रतियोगितावच्छेदकावच्छिन्नरजतसत्त्वज्ञानाभावादभावप्रत्यक्षानुपपत्तिः अवगते अपरोक्षावभासस्य तत्कालीनविषयसत्तानियतत्वात् रजते पारमार्थिकत्वमप्यनिर्व्वचनीयं रजतवदेवोत्पन्नमिति तदवच्छिन्न रजतसत्त्वे तदवच्छिन्नाभावस्तस्मिन् कथं वर्त्ततइति चेन्न पारमार्थिकत्वस्याधिष्ठाननिष्ठस्य रजते प्रतिभाससम्भवेन रजतनिष्ठपारमार्थिकत्वोत्पत्त्यनभ्युपगमात्। यत्रारोप्यमसन्निकृष्टं तत्रैव प्रातिभासिक वस्तूत्पत्तेरङ्गीकारात्। अतएव इन्द्रियसन्निकृष्टजवाकुसुमगतलौहित्यस्य स्फटिके भानसम्भवात् न तत् स्फटिकेऽनिर्व्वचनीयलौहित्योत्पत्तिः। नन्वेवं यत्र जवाकुसुमं द्रव्यान्तरव्यवधानादसन्निकृष्टं तत्र लौहित्यप्रतीत्या प्रातिभासिकं लौहित्यं स्वीक्रियेत इतिचेन्न इष्टत्वात्।

एवं प्रत्यक्षभ्रमान्तरेष्वपि प्रत्यक्षसामान्यलक्षणानुगमोऽयथार्थ प्रत्यक्षलक्षणासम्भवश्च दर्शनीयः।

उक्तप्रत्यक्षं प्रकारान्तरेण द्विविधम् । इन्द्रियजन्यं तदजन्यञ्चेति । तत्र इन्द्रियाजन्यं सुखादिप्रत्यक्षं मनस इन्द्रियत्वनिराकरणात् । इन्द्रियाणि पञ्च घ्राणरसनचक्षुस्त्वक्श्रोत्रात्मकानि । सर्व्वाणि चेन्द्रियाणि स्वस्वविषयसंयुक्तान्येव प्रत्यक्षज्ञानं जनयन्ति । तत्र घ्राणरसनत्वगिन्द्रियाणि स्वस्वस्थानस्थितान्येव गन्धरसस्पर्शोपलम्भान् जनयन्ति । चक्षुःश्रोत्रे तु स्वतएव विषयदेशं गत्वा स्वस्वविषयं गृह्णीतः श्रोत्रस्यापि चक्षुरादिवत्परिच्छिन्नतया भेर्य्यादिदेशगमनसम्भवात् अतएवानुभवो भेरीशब्दो मया श्रुतइति । वीचीतरङ्गन्यायेन कर्णशष्कुलीप्रदेशेऽनन्तशब्दोत्पत्तिकल्पनायां गौरवं भेरीशब्दो मया श्रुत इति प्रत्यक्षस्य भ्रमत्वकल्पनायां गौरवञ्च स्यात् ।

तदेवं व्याख्यातं प्रत्यक्षम् ।

इति परिभाषायां प्रत्यक्षपरिच्छेदः ।

परिभाषा।

द्वितीयः परिच्छेदः।

अथानुमानं निरूप्यते।

अनुमितिप्रमाकरणमनुमानम्। अनुमितिश्च व्याप्तिज्ञानेन व्याप्तिज्ञानजन्या। व्याप्तिज्ञानानुव्यवसायादेस्तत्त्वेन तज्जन्यत्वाभावान्नानुमितित्वम्। अनुमितिकरणञ्च व्याप्तिज्ञानं तत्संस्कारोऽवान्तर व्यापारः न तु तृतीयलिङ्गपरामर्शोऽनुमितिकरणं तस्यानुमितिहेतुत्वासिद्ध्या तत्करणत्वस्य दूरनिरस्तत्वात्। नच संस्कारजन्यत्वेनानुमितेः स्मृतित्वापत्तिः स्मृतिप्रागभावजन्यत्वस्य संस्कारमात्रजन्यत्वस्य वा स्मृतित्वप्रयोजकतया संस्कारध्वंससाधारणसंस्कारजन्यत्वस्य तत्प्रयोजकत्वात्।

न च यत्र व्याप्तिस्मरणादनुमितिस्तत्र कथं संस्कारो हेतुरिति वाच्यं व्याप्तिस्मृतिस्थलेऽपि तत्संस्कारस्यैवानुमितिहेतुत्वात् नहि स्मृतेः संस्कारनाशकत्वनियमः स्मृतिधारादर्शनात्। नचानुद्बुद्धसंस्कारादनुमित्यापत्तिस्तदुद्बोधस्यापि सहकारित्वात्। एवञ्चायं धूमवानिति पक्षधर्म्मताज्ञाने धूमो वह्निव्याप्य इत्यनुभवाहितसंस्कारोद्बोधे च

सति वह्निमानित्यनुमितिर्भवति न तु मध्ये व्याप्तिस्मरणानन्तरं तत्कथं वह्निव्याप्यधूमवानयमित्यादिविशिष्टज्ञानं वा हेतुत्वेन कल्पनीयं गौरवात्प्रमाणाभावाच्च। तच्च व्याप्तिज्ञानं वह्निविषयकत्वांशे एव कारणं न तु पर्व्वतविषयकत्वांशे इति पर्व्वतो वह्निमानिति ज्ञानस्य वह्न्यंशे एवानुमितित्वं न पर्व्वतांशे तदंशे प्रत्यक्षत्वस्योपपादितत्वात्। व्याप्तिश्चाशेषसाधनाश्रयाश्रितसाध्यसामानाधिकरण्यरूपा। सा च व्यभिचारादर्शने सति सहचारदर्शनेन गृह्यते। तच्च सहचारदर्शनं भूयोदर्शनं सकृद्दर्शनं वेति विशेषो नादरणीयः सहचारदर्शनस्यैव प्रयोजकत्वात्।

तच्चानुमानमन्वयिरूपमेकमेव न तु केवलान्वयि सर्व्वस्यापि धर्म्मस्यास्मन्मते ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वेनात्यन्ताभावाप्रतियोगिसाध्यकत्वरूपकेवलान्वयित्वस्यासिद्धेः। नाप्यनुमानस्य व्यतिरेकिरूपत्वं साध्याभावे साधनाभावनिरूपितव्याप्तिज्ञानस्य साधनेन साध्यानुमितावनुपयोगात्। कथं तर्हि धूमादावन्वयव्याप्तिमविदुषोऽपि व्यतिरेकव्याप्तिज्ञानादनुमितिः अर्थापत्तिप्रमाणादिति वक्ष्यामः। अत एवानुमानस्य नान्वयव्यतिरेकिरूपत्वं व्यतिरेकव्याप्तिज्ञानस्यानुमित्यहेतुत्वात्।

तच्चानुमानं स्वार्थपरार्थभेदेन द्विविधम्। तत्र स्वार्थन्तूक्तमेव परार्थन्तु न्यायसाध्यम्। न्यायो नामावयवसमुदायः। अवयवाश्च त्रय एव प्रतिज्ञाहेतूदाहरणरूपाः उदाहरणोपनयनिगमनरूपा वा न तु पञ्च अवयवत्रयेणैव व्याप्तिपक्षधर्म्मतयोरुपदर्शनसम्भवेनाधिकावयवद्वयस्य व्यर्थत्वात्।

एवमनुमाने निरूपिते तस्मात् ब्रह्मभिन्ननिखिलमिथ्यात्वसिद्धिः। तथाहि ब्रह्मभिन्नं सर्व्वं मिथ्या ब्रह्मभिन्नत्वात् यदेवं तदेवं यथा शुक्तिरूप्यम्। न च दृष्टान्तासिद्धिः तस्य साधितत्वात्। न चा-

प्रयोजकत्वं शुक्तिरूप्यरज्जुसर्पादीनां मिथ्यात्वे ब्रह्मभिन्नत्वस्यैव लाघवेन प्रयोजकत्वात्। मिथ्यात्वञ्च स्वाश्रयत्वेनाभिमतयावन्निष्ठात्यन्ताभावप्रतियोगित्वम्। अभिमतपदमसम्भववारणाय यावत्पदमर्थान्तरवारणाय। तदुक्तम्। सर्व्वेषामपि भावानां स्वाश्रयत्वेन सम्मते। प्रतियोगित्वमत्यन्ताभावं प्रति मृषात्मता इति। यद्वा अयं पटः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी पटत्वात् पटान्तरवत् इत्यनुमानं मिथ्यात्वे प्रमाणम्। तदुक्तम्। अंशिनः स्वांशगात्यन्ताभावस्य प्रतियोगिता। अंशित्वादितरांशीव दिगेषैव गुणादिष्विति। न च घटादेर्मिथ्यात्वे सन् घट इति प्रत्यक्षेण बाधः अधिष्ठानब्रह्मसत्तायास्तत्र विषयतया घटादेः सत्यत्वासिद्धेः।

न च नीरूपस्य ब्रह्मणः कथं चाक्षुषादिज्ञानविषयतेति वाच्यं नीरूपस्यापि रूपादेः प्रत्यक्षविषयत्वात्। न च नीरूपस्य द्रव्यस्य चक्षुराद्ययोग्यत्वमितिनियमः सम्भते ब्रह्मणोऽद्रव्यत्वासिद्धेः गुणाश्रयत्वं समवायिकारणत्वं वा द्रव्यत्वमिति तेऽभिमतं नहि निर्गुणस्य ब्रह्मणो गुणाश्रयता नापि समवायिकारणता समवायासिद्धेः। अस्तु वा द्रव्यत्वं ब्रह्मणस्तथापि नीरूपस्य कालस्येव चाक्षुषादिज्ञानविषयत्वेनाविरोधः। यद्वा त्रिविधं सत्त्वं पारमार्थिकं व्यावहारिकं प्रातिभासिकञ्चेति। तत्र पारमार्थिकं सत्त्वं ब्रह्मणः व्यावहारिकं सत्त्वमाकाशादेः प्रातिभासिकं सत्त्वं शुक्तिरजतादेः। तथा च घटः सन्निति प्रत्यक्षस्य व्यावहारिकसत्त्वविषयत्वेन प्रामाण्यम्। अस्मिन् पक्षे घटादेर्ब्रह्मणि निषेधो न स्वरूपेण किन्तु पारमार्थिकत्वेनेति न विरोधः। अस्मिन् पक्षे च मिथ्यात्वलक्षणे पारमार्थिकत्वावच्छिन्नप्रतियोगिकत्वमत्यन्ताभावविशेषणं द्रष्टव्यम्। तस्मादुपपन्नं मिथ्यात्वानुमानमिति।

इति परिभाषायामनुमानपरिच्छेदः।

परिभाषा।

तृतीयः परिच्छेदः।

अथोपमानं निरूप्यते।

सादृश्यप्रमाकरणमुपमानम्। तथा हि नगरेषु दृष्टगोपिण्डस्य पुरुषस्य वनं गतस्य गवयेन्द्रियसन्निकर्षे सति भवति प्रतीतिरयं पिण्डो गोसदृश इति तदनन्तरञ्च भवति निश्चयोऽनेन सदृशी मदीया गौरिति। तत्रान्वयव्यतिरेकाभ्यां गवयनिष्ठगोसादृश्यज्ञानं करणं गोनिष्ठगवयसादृश्यज्ञानं फलम्।

नचेदं प्रत्यक्षेण सम्भवति गोपिण्डस्य तदेन्द्रियासन्निकर्षात् नाप्यनुमानेन गवयनिष्ठगोसादृश्यस्यातल्लिङ्गत्वात्। नापि मदीया गौरेतद्गवयसदृशी एतन्निष्ठसादृश्यप्रतियोगित्वात् योयत्साद‍ृश्यप्रतियोगी स तत्सदृशः यथा मैत्रनिष्ठसादृश्यप्रतियोगी चैत्रो मैत्रसदृश इत्यनुमानात् तत्सम्भव इति वाच्यम् एवंविधानुमानानवतारेऽप्यनेन सदृशी मदीया गौरिति प्रतीतेरनुभवसिद्धत्वादुपमिनोमीत्यनुव्यव सायाच्च। तस्मादुपमानं मानान्तरम्।

इति परिभाषायामुपमानपरिच्छेदः।

चतुर्थः परिच्छेदः ।

अथागमो निरूप्यते ।

यस्य वाक्यस्य तात्पर्य्यविषयीभूतसंसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणम्। वाक्यजन्ये च ज्ञाने आकाङ्क्षायोग्यतासत्तयस्तात्पर्य्यज्ञानञ्चेति चत्वारि कारणानि ।

तत्र पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वमाकाङ्क्षा क्रियाश्रवणे कारकस्य कारकश्रवणे क्रियायाः करणश्रवणे इतिकर्त्तव्यतायाश्च जिज्ञासाविषयत्वात्। अजिज्ञासोरपि वाक्यार्थबोधात् योग्यत्वमुपात्तं तदवच्छेदकञ्च क्रियात्वकारकत्वादिकमिति नातिव्याप्तिः। अभेदान्वये च समानविभक्तिकपदप्रतिपाद्यत्वं तदवच्छेदकमिति तत्त्वमस्यादि वाक्येषु नाव्याप्तिः। एतादृशाभिप्रायेणैव बलाबलाधिकरणे सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्र वैश्वदेवयागस्यामिक्षान्वितत्वेन न वाजिनाकाङ्क्षेत्यादिव्यवहारः। ननु तथापि वाजिनस्य जिज्ञासाविषयत्वेऽपि तद्योग्यत्वमस्त्येव प्रदेयद्रव्यत्वस्य यागनिरूपितजिज्ञासाविषयतावच्छेदकत्वात् इतिचेन्न स्वसमानजातीयपदार्थान्वयबोधविरह

सहृदतप्रदेयद्रव्यत्वस्यैव तदवच्छेदकत्वेन वाजिनद्रव्यस्य स्वसमान जातीयामिक्षाद्रव्यान्वयबोधसहकृतत्वेन तादृशावच्छेदकत्वाभावात् । आमिक्षायान्तु नैवं वाजिनान्वयस्य तदानुपस्थानात् । उदाहरणान्तरेष्वपि दुर्ब्बलत्वप्रयोजकाकाङ्क्षाविरह एवमेव द्रष्टव्यः ।

योग्यता च तात्पर्य्यविषयसंसर्गाबाधः । वह्निना सिञ्चतीत्यादौ तादृशसंसर्गबाधान्न योग्यता । स प्रजापतिरात्मनोवपामुदखिदत् इत्यादावपि तात्पर्य्यविषयभूतपशुप्राशस्त्याबाधाद्योग्यता । तत्त्वमस्यादि वाक्येष्वपि वाच्याभेदबाधेऽपि लक्ष्यस्वरूपाभेदे बाधाभावाद्योग्यता ।

आसत्तिश्चाव्यवधानेन पदजन्यपदार्थोपस्थितिः । नागान्तरोपस्थापितपदार्थस्यान्वयबोधाभावात् पदजन्येति । अतएवाश्रुतस्थले तत्तत्पदाध्याहारः द्वारमित्यादौ पिधेहीत्यादिः अतएवैवे स्वेत्यादौ किन्दधीतिपदाध्याहारः अतएव विश्वजितु सूर्य्यायत्वा जुष्टं निर्व्वपामीतिपदप्रयोगः ।

पदार्थश्च द्विविधः शक्यो लक्ष्यश्चेति । तत्र शक्तिर्नाम पदार्थानामर्थेषु मुख्या वृत्तिः यथा घटपदस्य पृथुबुध्नोदराकृतिविशिष्ट वस्तुविशेषे वृत्तिः । सा च शक्तिः पदार्थान्तरम् सिद्धान्ते कारणेषु कार्य्यानुकूलशक्तिमात्रस्य पदार्थान्तरत्वात् । सा च तत्तत्पदजन्य पदार्थज्ञानरूपकार्य्यानुमेया । तादृशशक्तिविषयत्वं शक्यत्वं तच्च जातेरेव न व्यक्तेः व्यक्तीनामानन्त्येन गुरुत्वात् । कथं तर्हि गवादिपदाद्व्यक्तिभानमितिचेत् जातेर्व्यक्तिसमानसंविद्वेद्यत्वादिति ब्रूमः । यद्वा गवादिपदानां व्यक्तौ शक्तिः स्वरूपसती नतु ज्ञाता जातौ तु सा ज्ञाता हेतुः । न च व्यक्त्यंशे शक्तिज्ञानमपि कारणं गौरवात् जाति शक्तित्वज्ञाने सति व्यक्तिशक्तिज्ञानं विना व्यक्तिधीविलम्बाभावाच्च । अतएव न्यायमतेऽप्यन्वयेऽपि शक्तिः स्वरूपसतीति सिद्धान्तः

ज्ञायमानशक्तिविषयत्वमेव वाच्यत्वमिति व्यक्तिरवाच्या। अथवा अन्ते लक्षणयावगमः यथा नीलोघटइत्यत्र नीलशब्दस्य नीलगुणविशिष्टे लक्षणा तथा जातिवाचकस्य तद्विशिष्टे लक्षणा। तदुक्तम्। अनन्यलभ्यः शब्दार्थइति। एवं शक्योनिरूपितः।

अथ लक्ष्यपदार्थोनिरूप्यते। तत्र लक्षणाविषयोलक्ष्यः। लक्षणा च द्विविधा केवललक्षणा लक्षितलक्षणा चेति। तत्र शक्य साक्षात्सम्बन्धः केवललक्षणा यथा गङ्गायां घोषइत्यत्र प्रवाहसाक्षात् सम्बन्धिनि तीरे गङ्गापदस्य केवललक्षणा। यत्र शक्यपरम्परा सम्बन्धेनार्थान्तरप्रतीतिस्तत्र लक्षितलक्षणा यथा द्विरेफपदस्य रेफ द्वययुक्तभ्रमरपदघटितपरम्परासम्बन्धेन मधुकरेषु वृत्तिः। गौण्यपि लक्षितलक्षणैव यथा सिंहोमानवकइत्यत्र सिंहशब्दवाच्यसम्बन्धि शौर्य्यादिसम्बन्धेन मानवस्य प्रतीतिः।

प्रकारान्तरेण लक्षणा त्रिधा जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति तत्र शक्यार्थमनन्तर्भाव्य यत्रार्थान्तरस्य प्रतीतिस्तत्र जहल्लक्षणा यथा विषं भुंक्ष्वेत्यत्र स्वार्थं विहाय शत्रुगृहे भोजननिवृत्तिर्लक्ष्यते। यत्र शक्यार्थमन्तर्भाव्यैव अर्थान्तरप्रतीतिः तत्राजहल्लक्षणा यथा शुक्लोघटइति अत्र हि शुक्लशब्दः स्वार्थं शुक्लगुणमन्तर्भाव्यैव तद्वति द्रव्ये लक्षणया वर्त्तते। यत्र हि विशिष्टवाचकः शब्दः एकदेशं विहाय एकदेशे वर्त्तते तत्र जहदजहल्लक्षणा यथा सोऽयं देवदत्तइति अत्र हि पदद्वयवाच्ययोर्व्विशिष्टयोरैक्यानुपपत्त्या पदद्वयस्य विशेष्यमात्रपरत्वं यथा वा तत्त्वमसीत्यादौ तत्पदवाच्यसर्व्वज्ञत्वादि विशिष्टस्य त्वं पदवाच्येनान्तःकरणविशिष्टेनैक्यायोगात् ऐक्यसिद्ध्यर्थं स्वरूपे लक्षणेति साम्प्रदायिकाः। वयन्तु ब्रूमः सोऽयं देवदत्तः तत्त्वमसीत्यादौ विशिष्टवाचकानां पदानामेकदेशपरत्वेऽपि न लक्षणा

शक्त्युपस्थितविशिष्टयोरभेदान्वयानुपपत्तावपि विशेष्ययोः शक्त्युपस्थितयोरेवान्वयबोधाविरोधात् यथा घटोनित्यइत्यत्र घटपदवाच्यैकदेशघटत्वस्यायोग्यत्वेऽपि योग्यघटव्यक्त्या सह नित्यत्वान्वयः। यत्र पदार्थैकदेशस्य विशेषणतयैवोपस्थितिस्तत्रैव स्वातन्त्र्येणोपस्थितये लक्षणाभ्युपगमः यथा नित्योघटइत्यत्र घटपदाद्घटत्वस्य शक्त्या स्वातन्त्र्येणानुपस्थित्या तादृशोपस्थित्यर्थं घटपदस्य घटत्वे लक्षणा एवमेव तत्त्वमस्यादिवाक्येऽपि न लक्षणा शक्त्या स्वातन्त्र्येणोपस्थितयोस्तत्त्वंपदार्थयोरभेदान्वये वाधकाभावात्। अन्यथा गेहे घटः घटे रूपं घटमानय इत्यादौ घटत्वगेहत्वादेरभिमतान्वयबोधायोग्यतया तत्रापि घटादिपदानां विशेष्यमात्रपरत्वे लक्षणा च स्यात्। तस्मात्तत्त्वमस्यादिवाक्येषु आचार्याणां लक्षणोक्तिरभ्युपगमवादेन बोध्या। जहदजहल्लक्षणोदाहरणन्तु काकेभ्योदधि रक्ष्यतामित्यादिकमेव। तत्र शक्यकाकत्वपरित्यागेनाशक्यदध्युपघातकत्वपुरस्कारेण काके काकशब्दप्रवृत्तिः।

लक्षणावीजन्तु तात्पर्य्यानुपपत्तिरेव नत्वन्वयानुपपत्तिः काकेभ्योदधि रक्ष्यतामित्यत्रान्वयानुपपत्त्यभावात् गङ्गायां घोषइत्यादौ तात्पर्य्यानुपपत्तेरपि भावात्।

लक्षणा न पदमात्रवृत्तिः किन्तु वाक्यवृत्तिरपि यथा गभीरायां नद्यां घोष इत्यत्र गभीरायां नद्यामिति पदद्वयसमुदायस्य तीरे लक्षणा। ननु वाक्यस्याशक्ततया कथं शक्यसम्बन्धरूपा लक्षणा। उच्यते। शक्त्या यत्पदसम्बन्धेन ज्ञाप्यते तत्सम्बन्धोलक्षणा शक्तिज्ञाप्यश्च यथा पदार्थस्तथा वाक्यार्थोऽपि इति न काचिदनुपपत्तिः।

एवमर्थवादवाक्यानां प्रशंसारूपायां प्राशस्त्ये लक्षणा सोऽरोदीदित्यादिनिन्दार्थवादवाक्यानां निन्दितत्वे लक्षणा अर्थवाद-

नवपदानां प्राशस्त्यादिलक्षणाभ्युपगमे एकेन पदेन लक्षणया तदुपस्थितिसम्भवे पदान्तरवैयर्थ्यं स्यात् एवञ्च विध्यपेक्षितप्राशस्त्यरूपपदार्थप्रत्यायकतया अर्थवादपदसमुदायस्य पदस्थानीयतया विधिपदेनैकवाक्यत्वं भवतीत्यर्थवादवाक्यानां पदैकवाक्यता । क्व तर्हि वाक्यैकवाक्यता यत्र प्रत्येकं भिन्नभिन्नसंसर्गप्रतिपादकयोर्वाक्ययोराकाङ्क्षावशेन महावाक्यार्थबोधकत्वं यथा दर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिवाक्यानां समिधो यजतीत्यादिवाक्यानाञ्च परस्पराङ्गाङ्गिभावबोधकतयैकवाक्यता । तदुक्तम् भट्टपादैः । स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया । वाक्यानामेकवाक्यत्वं पुनः संहत्य जायतइति ।

एवं द्विविधोऽपि पदार्थो निरूपितः तदुपस्थितिश्चासत्तिः सा च शाब्दबोधे हेतुः तथैवान्वयव्यतिरेकदर्शनात् एवं महावाक्यार्थबोधेऽवान्तरवाक्यार्थबोधो हेतुः तथैवान्वयाद्यवधारणात् ।

क्रमप्राप्तं तात्पर्य्यं निरूप्यते । तत्र तत्प्रतीतीच्छयोच्चरितत्वं न तात्पर्य्यं अर्थज्ञानशून्येन पुरुषेणोच्चरिताद्वेदादर्थप्रत्ययाभावप्रसङ्गात् अयमध्यापकोऽव्युत्पन्नइतिविशेषदर्शनेन तात्पर्य्यभ्रमस्याप्यभावात् । नचेश्वरीयतात्पर्य्यज्ञानात्तत्र शाब्दबोधइति वाच्यं ईश्वरानङ्गीकर्त्तुरपि तद्वाक्यार्थप्रतिपत्तिदर्शनात् ।

उच्यते । तत्प्रतीतिजननयोग्यत्वं तात्पर्य्यं गेहे घटइति वाक्यं गेहघटसंसर्गप्रतीतिजननयोग्यं न तु पटसंसर्गप्रतीतिजननयोग्यमिति तद्वाक्यं घटसंसर्गपरं न तु पटसंसर्गपरमित्युच्यते ।

ननु सैन्धवमानयेत्यादिवाक्यं यदा लवणानयनप्रतीतीच्छया प्रयुक्तं तदाप्यश्वसंसर्गप्रतीतिजनने स्वरूपयोग्यतासत्त्वादश्वपरत्वज्ञानदशायामश्वादिसंसर्गज्ञानापत्तिरिति चेन्न तदितरप्रतीतीच्छयानुच्चरित-

त्वस्यापि तात्पर्य्यविशेषणत्वात् तथाच यद्वाक्यं यत्प्रतीतिजननयोग्यत्वे सति तदन्यप्रतीतीच्छया नोच्चरितं तद्वाक्यं तत्संसर्गपरमित्युच्यते। शुकादिवाक्येऽप्युत्पन्नोच्चरितवेदवाक्यादौ च प्रतीतीच्छाया एवाभावात् तदन्यप्रतीतीच्छयोच्चरितत्वाभावेन लक्षणसत्त्वान्नाव्याप्तिः। नचोभयप्रतीतीच्छयोच्चरितेऽव्याप्तिः तदन्यमात्रप्रतीतीच्छयानुच्चरितत्वस्य विवक्षितत्वात् उक्तप्रतीतिमात्रजननयोग्यतायास्तावच्छेदिकाशक्तिःअस्माकं मते सर्व्वत्रकारणतायां शक्तेरेवावच्छेदकत्वादिति न कोपिदोषः।

एवं तात्पर्य्यस्य प्रतीतिजनकत्वरूपस्य शाब्दज्ञानजनकत्वे चतुर्थवर्णके तात्पर्य्यस्य ज्ञानहेतुत्वनिराकरणवाक्यं तत्प्रतीतीच्छयोच्चरितत्वरूपतात्पर्य्यनिराकरणपरम् अन्यथा तात्पर्य्यनिश्चयफलकवेदान्तविचारवैयर्थ्यप्रसङ्गात्।

केचित्तु शाब्दज्ञानत्वावच्छेदेन तत्तात्पर्य्यज्ञानं हेतुरित्येवं परं चतुर्थवर्णकवाक्यं तात्पर्य्यसंशयविपर्य्ययोत्तरशाब्दज्ञानविशेषे च तात्पर्य्यज्ञानं हेतुरेव इदं वाक्यं एतत्परं उतान्यपरमिति संशये तद्विपर्य्यये च तदुत्तरवाक्यार्थविशेषनिश्चयस्य तात्पर्य्यनिश्चयं विनानुपपत्तेरित्याहुः।

तच्च तात्पर्य्यं वेदे मीमांसापरिशोधितन्यायादेवावधार्य्यते लोके तु प्रकरणादिना। तत्र लौकिकवाक्यानां मानान्तरावगतार्थतयानुवादकत्वं वेदे तु वाक्यार्थस्यापूर्व्वतया नानुवादकत्वं तत्र लोके वेदे च कार्य्यपराणामिव सिद्धार्थानामपि प्रामाण्यं पुत्रस्ते जातइत्यादिषु सिद्धपदार्थेऽपि पदानां सामर्थ्यावधारणात्। अतएव वेदान्तवाक्यानां ब्रह्मणि प्रामाण्यं। यथा चैतत्तथा विषयपरिच्छेदे वक्ष्यते।

तत्र वेदानां नित्यसर्व्वज्ञपरमेश्वरप्रणीतत्वेन प्रामाण्यमिति नैयायिकाः। वेदानां नित्यत्वेन निरस्तसमस्तपुंदूषणतया प्रामाण्य-

मिति अध्वरमीमांसकाः। अस्माकं मते वेदोऽनित्य उत्पत्तिमत्त्वात् उत्पत्तिमत्त्वञ्च अस्य महतोभूतस्य निश्वसितमेतत् यदृग्वेदोयजुर्व्वेदः सामवेदोऽथर्व्ववेदइत्यादिश्रुतेः। नापि वेदानां क्षणिकावस्थायित्वं य एव वेदोदेवदत्तेनाधीतः स एवः मयाधीत्यादिप्रत्यभिज्ञाविरोधात्। अतएव गकारादिवर्णानामपि न क्षणिकत्वं सोऽयं गकार इत्यादिप्रत्यभिज्ञाविरोधात्। तथाच वर्णपदवाक्यतत्समुदायरूपस्य वेदस्य वियदादिवत् सृष्टिकालीनोत्पत्तिकत्वं प्रलयकालीनध्वंसप्रतियोगित्वञ्च न तु मध्ये वर्णानामुत्पत्तिविनाशौ अनन्तगकारादिकल्पनायां गौरवात्। अनुच्चारणदशायां वर्णानामनभिव्यक्तिस्तदुच्चारणरूपव्यञ्जकाभावात् न विरुध्यते अन्धकारस्थघटानुपलब्धिवत्। उत्पन्नो गकारइत्यादिप्रतीतिस्तु सएवायं गकारइत्यादिप्रत्यभिज्ञाविरोधादप्रमाणं वर्णाभिव्यञ्जकध्वनिगतोत्पत्तिनिरूपितपरम्परासम्बन्धविषयत्वेन प्रमाणं वा। तस्मान्न वेदानां क्षणिकत्वम्।

ननु क्षणिकत्वाभावेऽपि वियदादिप्रपञ्चवदुत्पत्तिमत्त्वेन परमेश्वरकर्त्तृकतया पौरुषेयत्वादपौरुषेयत्वं वेदानामिति तव सिद्धान्तोभज्येतेतिचेन्न न तावत्पुरुषेणोच्चार्य्यमाणत्वं पौरुषेयत्वं गुरुमतेऽपि पौरुषेयत्वापत्तेः नापि पुरुषाधीनोत्पत्तिकत्वं पौरुषेयत्वं नैयायिकाभिमतपौरुषेयत्वानुमानेऽस्मदादिना सिद्धसाधनापत्तेः। किन्तु सजातीयोच्चारणानपेक्षोच्चारणविषयत्वम् तथाच सर्गाद्यकाले परमेश्वरः पूर्व्वसर्गसिद्धवेदानुपूर्व्वीकवेदं विरचितवान् न तु तद्विजातीयं वेदमिति न सजातीयोच्चारणानपेक्षोच्चारणविषयत्वं पौरुषेयत्वं वेदस्य। भारतादीनान्तु सजातीयोच्चारणमनपेक्ष्यैवोच्चारणमिति तेषां पौरुषेयत्वम्।

एवं पौरुषेयापौरुषेयभेदेन द्विविध आगमोनिरूपितः।

इति परिभाषायामागमपरिच्छेदः।

पञ्चमः परिच्छेदः।

इदानीमर्थापत्तिर्निरूप्यते।

तत्रोपपाद्यज्ञानेनोपपादककल्पनमर्थापत्तिः। तत्रोपपाद्यज्ञानं करणं उपपादकज्ञानं फलम्। येन विना यदनुपपन्नं तत्तत्रोपपाद्यं यस्याभावे यस्यानुपपत्तिः तत्तत्रोपपादकं यथा रात्रिभोजनेन विना दिवाऽभुञ्जानस्य पीनत्वमनुपपन्नमिति तादृशं पीनत्वमुपपाद्यं यथा वा रात्रिभोजनस्याभावे तादृशपीनत्वस्यानुपपत्तिरिति रात्रिभोजनमुपपादकं रात्रिभोजनकल्पनारूपायां प्रमितौ अर्थस्यापत्तिः कल्पनेति षष्ठीसमासेनार्थापत्तिशब्दो वर्त्तते कल्पनाकरणे पीनत्वादिज्ञाने तु अर्थस्यापत्तिः कल्पना यस्मादिति बहुव्रीहिसमासेन वर्त्तते इति फलकरणयोरुभयोस्तत्प्रयोगः।

सा चार्थापत्तिर्द्विधा दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति। दृष्टार्थापत्तिर्यथा इदं रजतमिति पुरोवर्त्तिनि प्रतिपन्नस्य रजतस्य नेदं रजतमिति तत्रैव निषिध्यमानत्वं सत्यत्वेऽनुपपन्नमिति रजतस्य सद्भिन्नत्वं सत्यत्वात्यन्ताभाववत्त्वं वा मिथ्यात्वं कल्पयति। श्रुतार्थापत्तिर्यथा यत्र श्रूयमाणवाक्यस्य स्वार्थानुपपत्तिमुखेनार्थान्तरकल्पनं यथा तरति शोकमात्मविदित्यत्र श्रुतस्य शोकशब्दवाच्यबन्धजातस्य ज्ञाननिवर्त्त्यत्वानुपपत्त्या बन्धस्य मिथ्यात्वं कल्प्यते। यथा वा जीवी देवदत्तो गृहे नेति वाक्यश्रवणानन्तरं जीविनो गृहासत्त्वं बहिःसत्त्वं कल्पयति।

श्रुतार्थापत्तिश्च द्विविधा अभिधानानुपपत्तिः अभिहितानुपपत्तिश्च । यत्र वाक्यैकदेशश्रवणेऽन्वयाभिधानानुपपत्त्यान्वयाभिधानोपयोगि पदान्तरं कल्प्यते तत्राभिधानानुपपत्तिः यथा द्वारमित्यत्र पिधेहीतिपदाध्याहारः यथा वा विश्वजिता यजेतेत्यत्र स्वर्गकामपदाध्याहारः । ननु द्वारमित्यादावन्वयाभिधानात् पूर्व्वमिदमन्वयाभिधानं पिधानोपस्थापकपदं विनानुपपन्नमिति कथं ज्ञातमितिचेन्न अभिधानपदेन करणव्युत्पत्त्या तात्पर्य्यस्य विवक्षितत्वात् तथाच द्वारकर्म्मकपिधानक्रियासंसर्गपरत्वं पिधानोपस्थापकपदं विनानुपपन्नमिति ज्ञानं तत्रापि सम्भाव्यते ।

अभिहितानुपपत्तिस्तु यत्र वाक्यावगतोऽर्थोऽनुपपन्नत्वेन ज्ञातः सन्नर्थान्तरं कल्पयति तत्र द्रष्टव्या यथा स्वर्गकामो ज्योतिष्टोमेन यजेतेत्यत्र स्वर्गसाधनत्वस्य क्षणिकयागगतस्यानुपपत्त्या मध्यवर्त्त्यपूर्व्वं कल्प्यते ।

नचेयमर्थापत्तिरनुमानेऽन्तर्भवितुमर्हति अन्वयव्याप्त्यज्ञानेनान्वयिन्यनन्तर्भावात् । व्यतिरेकिणश्चानुमानत्वं प्रागेव निरस्तम् । अतएवार्थापत्तिस्थलेऽनुमिनोमीति नानुव्यवसायः किन्त्वनेनेदं कल्पयामीति । नन्वर्थापत्तिस्थले इदमनेन विनानुपपन्नमिति ज्ञानं करणमित्युक्तं तत्र किमिदं तेन विनानुपपन्नत्वं तदभावव्यापकाभावप्रतियोगित्वमितिब्रूमः । एवमर्थापत्तेर्मानान्तरत्वसिद्धौ व्यतिरेकिनानुमानान्तरं पृथिवीतरेभ्योभिद्यते इत्यादौ गन्धवत्त्वमितरभेदं विनानुपपन्नमित्यादिज्ञानस्य करणत्वात् अतएवानुव्यवसायः पृथिव्यामितरभेदं कल्पयामीति ।

इति परिभाषायामर्थापत्तिपरिच्छेदः ।

परिभाषा ।

षष्ठः परिच्छेदः ।

इदानीं षष्ठं प्रमाणं निरूप्यते ।

ज्ञानकरणाजन्याभावानुभवासाधारणकारणमनुपलब्धिरूपं प्रमाणम् । अनुमानादिजन्यातीन्द्रियाभावानुभवहेतावनुमानादावतिव्याप्तिवारणायाजन्यान्तम् । अदृष्टादौ साधारणकारणेऽतिव्याप्तिवारणायासाधारणेति अभावस्मृत्यसाधारणहेतुसंस्कारेऽतिव्याप्तिवारणायानुभवेतिविशेषणम् । नचाभावानुमितिस्थलेप्यनुपलब्ध्यैवाभावो गृह्यतां विशेषाभावादितिवाच्यं धर्म्माधर्म्माद्यनुपलब्धिसत्त्वेऽपि तदभावानिश्चयेन योग्यानुपलब्धेरेवाभावग्राहकत्वात् ।

ननु केयं योग्यानुपलब्धिः किं योग्यस्य प्रतियोगिनोऽनुपलब्धिः उत योग्येऽधिकरणे प्रतियोगिनोऽनुपलब्धिः । नाद्यः स्तम्भे पिशाचभेदस्याप्रत्यक्षत्वापत्तेः । नान्त्यः आत्मनि धर्म्माद्यभावस्यापि प्रत्यक्षत्वापत्तेरितिचेन्न योग्याचासावनुपलब्धिश्चेति कर्म्मधारयाश्रयणात् अनुपलब्धेर्योग्यता च तर्कितप्रतियोगिसत्त्वप्रसञ्जितप्रतियोगिकत्वं यस्याभावोगृह्यते तस्य यः प्रतियोगी तस्य सत्त्वेनाधिकरणे तर्कितेन प्रसञ्जनयोग्यमापादनयोग्यं प्रतियोग्युपलब्धिस्वरूपं यस्यानुपलम्भस्य

तत्त्वं तदनुपलब्धेर्योग्यत्वमित्यर्थः। तथाहि स्फीतालोकवति भूतले यदि घटः स्यात्तदा घटोपलम्भः स्यादित्यापादनसम्भवात् तादृशभूतले घटाभावोऽनुपलब्धिगम्यः। अन्धकारे तु तादृशापादनाभावान्नानुपलब्धिगम्यता। अतएव स्तम्भे पिशाचसत्त्वे स्तम्भवत् प्रत्यक्षत्वापत्त्या तदभावोऽनुपलब्धिगम्यः। आत्मनि धर्माधर्मादि सत्त्वेऽप्यस्यातीन्द्रियतया निरुक्तोपलम्भापादनासम्भवान्न धर्माद्यभावस्यानुपलब्धिगम्यत्वम्।

ननु कारवीत्याधिकरणेन्द्रियसन्निकर्षस्थलेऽभावस्यानुपलब्ध्यत्वम् अनभिमतं तत्र कॢप्तेन्द्रियमेवाभावाकारवृत्तावपि करणं इन्द्रियान्वय व्यतिरेकानुविधानादिति चेन्न प्रतियोग्यनुपलब्धेरप्यभावग्रहहेतुत्वेन कॢप्तत्वेन करणत्वमात्रस्य कल्पनात्। इन्द्रियस्य चाभावेन समं सन्निकर्षाभावेनाभावग्रहाहेतुत्वात् इन्द्रियान्वयव्यतिरेकयोरधिकरणज्ञानाद्युपक्षीणत्वेनान्यथासिद्धेः।

ननु भूतले घटो नेत्याद्यभावानुभवस्थले भूतलांशे प्रत्यक्षत्वमुभय सिद्धमिति तत्र वृत्तिनिर्गमनस्यावश्यकत्वेन भूतलावच्छिन्नचैतन्यवत् तन्निष्ठघटाभावावच्छिन्नस्यापि प्रमातृभिन्नतया घटाभावस्य प्रत्यक्षतैव सिद्धान्तेऽपीति चेत् सत्यं अभावप्रतीतेः प्रत्यक्षत्वेऽपि तत्करणस्यानुपलब्धेर्मानान्तरत्वात्। नहि फलीभूतज्ञानस्य प्रत्यक्षत्वे तत्करणस्य प्रत्यक्षप्रमाणतानियतत्वमस्ति। दशमस्त्वमसीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वेऽपि तत्करणस्य वाक्यस्य प्रत्यक्षप्रमाणभिन्नप्रमाणत्वाभ्युपगमात्। फलवैजात्यं विना कथं प्रमाणवैजात्यमिति चेन्न वृत्तिवैजात्यमात्रेण प्रमाणवैजात्योपपत्तेः। तथाच घटाभावाकारवृत्तिर्नेन्द्रियजन्या इन्द्रियस्य विषयेणासन्निकर्षात् किन्तु घटानुपलब्धिरूपमानान्तरजन्येति भवत्यनुपलब्धेर्मानान्तरत्वम्।

ननु अनुपलब्धिरूपमानान्तरपक्षेऽप्यभावप्रतीतेः प्रत्यक्षत्वे घटवति घटाभावभ्रमस्यापि प्रत्यक्षत्वापत्तौ तत्राप्यनिर्व्वचनीयघटाभावो ऽभ्युपगम्येत। नचेष्टापत्तिः तस्य मायोपादानकत्वेऽभावत्वानुपपत्तेः। मायोपादानकत्वाभावे मायायाः सकलकार्य्योपादानत्वानुपपत्तिरिति चेन्न घटवति घटाभावभ्रमो न तत्कालोत्पन्नघटाभावविषयकः किन्तु भूतलरूपादौ विद्यमानोलौकिकोघटाभावोभूतले आरोप्यते इति अन्यथाख्यातिरेव। आरोप्यसन्निकर्षस्थले सर्व्वत्रान्यथाख्यातेरेव व्यवस्थापनात्। अस्तु वा प्रतियोगिमति तदभावभ्रमस्थले तदभावस्या निर्व्वचनीयत्वं तथापि तदुपादानं मायैव नह्युपादानोपादेययोरत्यन्त साजात्यं तन्तुपटयोरपि तन्तुत्वपटत्वादिना वैजात्यात् यत्किञ्चित्साजात्यस्य मायाया अनिर्व्वचनीयघटाभावस्य च मिथ्यात्वधर्म्मस्य विद्यमानत्वात्। अन्यथा व्यावहारिकं घटाभावं प्रति कथं मायोपादानमिति कुतोनाशङ्केथाः। न च विजातीययोरप्युपादानोपादेयभावे ब्रह्मैव जगदुपादानं स्यादिति वाच्यं प्रपञ्चभ्रमाधिष्ठानत्वरूपस्य तस्येष्टत्वात् परिणामित्वरूपस्योपादानत्वस्य निरवयवब्रह्मण्यनुपपत्तेः। तथाच प्रपञ्चस्य परिणाम्युपादानं माया न ब्रह्मेति सिद्धान्त इत्यलमतिप्रपञ्चेन।

स चाभावश्चतुर्व्विधः प्रागभावः प्रध्वंसोऽत्यन्ताभावोऽन्योन्याभावश्चेति। मृत्पिण्डादौ कारणे कार्य्यस्य घटादेरुत्पत्तेः पूर्व्वं योऽभावः स प्रागभावः स च भविष्यतीतिप्रतीतिविषयः।

तत्रैव घटस्य मुद्गरप्रहारानन्तरं योऽभावः स प्रध्वंसः ध्वंसस्यापि स्वाधिकरणकपालनाशे नाशएव। न च घटोन्मज्जनापत्तिः ध्वंसध्वंसस्यापि घटप्रतियोगिकध्वंसत्वात् अन्यथा प्रागभावध्वंसात्मकघटस्य विनाशे प्रागभावोन्मज्जनापत्तिः। नचैवमपि यत्र ध्वंसाधिकरणं

नित्यं तत्र कथं ध्वंसनाश इतिवाच्यं तादृशमधिकरणं यदि चैतन्यव्यतिरिक्तं तदा तस्य नित्यत्वमसिद्धं ब्रह्मव्यतिरिक्तस्य सर्व्वस्य ब्रह्मज्ञाननिवर्त्त्यताया वक्ष्यमाणत्वात्। यदि च ध्वंसाधिकरणं चैतन्यं तदा सिद्धिरारोपितप्रतियोगिकध्वंसस्याधिष्ठाने प्रतीयमानस्याधिष्ठानमात्रत्वात्। तदुक्तम्। अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनइति। एवं शुक्तिरूप्यविनाशोऽपि इदमवच्छिन्नचैतन्यमेव।

यत्राधिकरणे यस्य कालत्रयेप्यभावः सोऽत्यन्ताभावः। यथा वायौ रूपात्यन्ताभावः सोऽपि वियदादिवद्ध्वंसप्रतियोग्येव।

इदमिदं नेति प्रतीतिविषयोऽन्योन्याभावः। अयमेव विभागो भेदः पृथक्त्वं चेति व्यवह्रियते भेदातिरिक्तपृथक्त्वादौ प्रमाणाभावात्। अयं चान्योन्याभावोऽधिकरणस्य सादित्वे सादिः। यथा घटे पटभेदः। अधिकरणस्यानादित्वे अनादिरेव। यथा जीवे ब्रह्मभेदः ब्रह्मणि वा जीवभेदः। द्विविधोऽपि भेदो ध्वंसप्रतियोग्येव अविद्यानिवृत्तौ तत्परतन्त्राणां निवृत्त्यवश्यम्भावात्।

पुनरपि भेदोद्विविधः सोपाधिकोनिरुपाधिकश्चेति। तत्रोपाधिसत्ताव्याप्यसत्ताकत्वं सोपाधिकत्वं तत् शून्यत्वं निरुपाधिकत्वम्। तत्राद्योयथा एकस्यैवाकाशस्य घटाद्युपाधिभेदेन भेदः। यथा वा एकस्य सूर्य्यस्य जलभाजनभेदेन भेदः। तथाचैकस्यैव ब्रह्मणोऽन्तःकरणभेदाद्भेदः। निरुपाधिकभेदोयथा घटे पटभेदः। न च ब्रह्मण्यपि प्रपञ्चभेदाभ्युपगमेऽद्वैतविरोधः तात्त्विकभेदानभ्युपगमेन वियदादिवदद्वैताव्याघातात्। तदुक्तम् सुरेश्वराचार्य्यैः। अत्तमा भवतः कोयं साधकत्वप्रकल्पने। किं न पश्यसि संसारं तत्रैवाज्ञानकल्पितमिति। अतएव विवरणेऽविद्यानुमाने प्रागभावव्यतिरिक्तत्व विशेषणं तत्त्वप्रदीपिकायामविद्यालक्षणे भावत्वविशेषणं सङ्गच्छते।

एवं चतुर्विधानामभावानां योग्यानुपलब्ध्या प्रतीतिस्तेनानुपलब्धिर्मानान्तरम् ।

एवमुक्तानां प्रमाणानां प्रामाण्यं स्वतएव उत्पद्यते ज्ञायते च तथाहि स्मृत्यनुभवसाधारणं संवादिप्रवृत्त्यनुकूलं तद्वति तत्प्रकारकज्ञानत्वं प्रामाण्यं तच्च ज्ञानसामान्यसामग्रीप्रयोज्यं नत्वधिकं गुणमपेक्षते प्रमामात्रेऽनुगतगुणाभावात् । नापि प्रत्यक्षप्रमायां भूयोऽवयवेन्द्रियसन्निकर्षः रूपादिप्रत्यक्षे आत्मप्रत्यक्षे च तदभावात् सत्यपि तस्मिन् पीतः शङ्ख इतिप्रत्यक्षस्य भ्रमत्वाच्च । अतएव न सल्लिङ्गपरामर्शादिकमपि अनुमित्यादिप्रमायां गुणः असल्लिङ्गपरामर्शादिस्थलेऽपि विषयाबाधेनानुमित्यादेः प्रमात्वात् ।

नचैवमप्रमापि प्रमा स्यात् ज्ञानसामान्यसामग्र्‌यविशेषादितिवाच्यं दोषाभावस्यापि हेतुत्वाङ्गीकारात् । नचैवं परतस्त्वं आगन्तुकभावकारणापेक्षायामेवं परतस्त्वात् ज्ञायते च प्रामाण्यं स्वतः स्वतोग्राह्यत्वञ्च दोषाभावे सति यावत्स्वाश्रयग्राहकसामग्रीग्राह्यत्वम् । स्वाश्रयो वृत्तिज्ञानं तद्ग्राहकं साक्षिज्ञानं तेनापि वृत्तिज्ञाने गृह्यमाणे तद्गतं प्रामाण्यमपि गृह्यते । नचैवं प्रामाण्यसंशयानुपपत्तिः तत्र संशयानुरोधेन दोषस्यापि सत्त्वेन दोषाभावघटितस्वाश्रयग्राहकाभावेन तत्र प्रामाण्यस्यैवाग्रहात् । यद्वा यावत्स्वाश्रयग्राहकग्राह्ययोग्यत्वं स्वतस्त्वं संशयस्थले प्रामाण्यस्योक्तयोग्यतासत्त्वेऽपि दोषवशेनाग्रहात् न संशयानुपपत्तिः । अप्रामाण्यन्तु न ज्ञानसामान्यसामग्रीप्रयोज्यं प्रमायामप्यप्रमाण्यापत्तेः किन्तु दोषप्रयोज्यं नाप्यप्रामाण्यं यावत्स्वाश्रयग्राहकग्राह्यं अप्रामाण्यघटकतदभाववत्त्वादेर्वृत्तिज्ञानानुपनीतत्वेन साक्षिणा ग्रहीतुमशक्यत्वात् किन्तु विसंवादिप्रवृत्त्यादिलिङ्गकानुमित्यादिविषयइति परतएवाप्रामाण्यमुत्पद्यते ज्ञायते चेति ।

इति परिभाषायामनुपलब्धिपरिच्छेदः ।

परिभाषा।

सप्तमः परिच्छेदः।

एवं निरूपितानां प्रमाणानां प्रामाण्यं द्विविधम् व्यावहारिकतत्त्वावेदकत्वं पारमार्थिकतत्त्वावेदकत्वञ्चेति। तत्र ब्रह्मस्वरूपावगाहिप्रमाणव्यतिरिक्तानां सर्व्वप्रमाणानामाद्यं प्रामाण्यं तद्विषयाणां व्यवहारदशायां बाधाभावात्। द्वितीयन्तु जीवब्रह्मैक्यपराणां सदेव सौम्येदमग्रआसीदित्येवमादीनां तत्त्वमसीत्यन्तानां तद्विषयस्य जीवब्रह्मैक्यस्य कालत्रयाबाध्यत्वात्। तच्चैक्यं तत्त्वंपदार्थज्ञानाधीनज्ञानमिति प्रथमं तत्पदार्थो लक्षणप्रमाणाभ्यां निरूप्यते।

तत्र लक्षणं द्विविधम् स्वरूपलक्षणं तटस्थलक्षणञ्चेति। तत्र स्वरूपमेव लक्षणं स्वरूपलक्षणम् यथा सत्यं ज्ञानमनन्तं ब्रह्मेत्यत्र सत्यत्वादिकं स्वरूपलक्षणम्। ननु स्वस्य स्ववृत्तित्वाभावे कथं लक्षणमिति चेन्न स्वस्यैव स्वापेक्षया धर्म्मिधर्म्मभावकल्पनया लक्षणत्वसम्भवात्। तदुक्तम्। आनन्दोविषयानुभवोनित्यत्वञ्चेति सन्ति धर्म्माः अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते इति।

तटस्थलक्षणं नाम यावल्लक्ष्यकालमनवस्थितत्वे सति यद्व्यावर्त्तकं

तदेव यथा गन्धवत्त्वं पृथिवीलक्षणम्। महाप्रलये परमाणुषु उत्पत्तिकाले घटादिषु च गन्धाभावात्। प्रकृते च जगज्जन्मादिकारणत्वम्। अत्र जगत्पदेन कार्य्यजातं विवक्षितम्। कारणत्वञ्च कर्त्तृत्वं अतोऽविद्यादौ नातिव्याप्तिः। कर्त्तृत्वञ्च तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम्। ईश्वरस्य तावदुपादानगोचरापरोक्षज्ञानसद्भावे च यः सर्व्वज्ञः सर्व्ववित् यस्य ज्ञानमयं तपः। तस्मादेतद्ब्रह्म नाम रूपमन्नञ्च जायते इत्यादिश्रुतिर्म्मानम्। तादृशचिकीर्षासद्भावे च सोऽकामयत वहु स्यां प्रजायेयेतिश्रुतिर्म्मानम्। तादृशकृतौ च तन्मनोऽकुरुतेत्यादिवाक्यम्। ज्ञानेच्छाकृतीनामन्यतमगर्भं लक्षणत्रितयं विवक्षितं अन्यथा व्यर्थविशेषणापत्तेः। अतएव जन्मस्थितिध्वंसानामन्यतमस्यैव लक्षणे प्रवेशः। एवञ्च लक्षणानि नव सम्पद्यन्ते। ब्रह्मणोजगज्जन्मादिकारणत्वे च यतोवा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्तीत्यादिश्रुतिर्म्मानम्।

यद्वा निखिलजगदुपादानत्वं ब्रह्मणोलक्षणम्। उपादानत्वञ्च जगदध्यासाधिष्ठानत्वं जगदाकारेण परिणम्यमानमायाधिष्ठानत्वं वा। एतादृशमेवोपादानत्वमभिप्रेत्य इदं सर्व्वं यदयमात्मा सच्चासच्चाभवत् वहु स्यां प्रजायेयेत्यादिश्रुतिषु ब्रह्मप्रपञ्चयोस्तादात्म्यव्यपदेशः। घटः सन् घटोभाति घटइष्ट इत्यादिलौकिकव्यपदेशोऽपि सच्चिदानन्दरूपब्रह्मैक्याध्यासात्।

नन्वानन्दात्मकचिदध्यासात् घटादेरिष्टत्वव्यवहारे दुःखस्यापि तथाध्यासात् तत्रापीष्टत्वव्यवहारापत्तिरिति चेन्न आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोपः इत्यभ्युपगमेन दुःखादौ सच्चिदंशाध्यासेऽप्यानन्दाध्यासाभावात्। जगति नामरूपांशद्वय

व्यवहारस्तु अविद्यापरिणामात्मकनामरूपसम्बन्धात्। तदुक्तम्। अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्। आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयमिति।

अथ जगतो जन्मक्रमो निरूप्यते।

तत्र सर्गाद्यकाले परमेश्वरः सृज्यमानप्रपञ्चवैचित्र्यहेतुप्राणिकर्म्मसहकृतापरिमितानिरूपितशक्तिविशेषविशिष्टमायासहितः सन्नामरूपात्मकं निखिलप्रपञ्चं प्रथमं बुद्धावाकलय्य इदं करिष्यामीति सङ्कल्पयति तदैक्षत बहु स्यां प्रजायेयेति श्रुतेः। तत आत्मन आकाशादीनि पञ्च भूतानि अपञ्चीकृतानि तन्मात्रपदप्रतिपाद्यानि उत्पद्यन्ते। तत्राकाशस्य शब्दो गुणो वायोस्तु शब्दस्पर्शौ तेजसस्तु शब्दस्पर्शरूपाणि अपान्तु शब्दस्पर्शरूपरसाः पृथिव्यास्तु शब्दस्पर्शरूपरसगन्धाः। ननु शब्दस्याकाशमात्रगुणत्वं वाय्वादावपि तदुपलम्भात्। नासौ भ्रमः बाधकाभावात्।

इमानि भूतानि त्रिगुणमायाकार्य्याणि अतस्त्रिगुणात्मकानि। एतैश्च सत्त्वगुणोपेतैः पञ्चभूतैः श्रोत्रत्वक्चक्षूरसनघ्राणानि पञ्चेन्द्रियाणि मनोबुद्ध्यहङ्कारचित्तानि च जायन्ते। श्रोत्रादीनां पञ्चानां क्रमेणैव दिग्वातार्कवरुणाश्विनोऽधिष्ठातृदेवताः मनआदीनां चतुर्णां क्रमेण चन्द्रचतुर्म्मुखशङ्कराच्युताः अधिष्ठातृदेवताः। एतैरेव रजोगुणोपेतैः पञ्चभूतैर्यथाक्रमेण वाक्पाणिपादपायूपस्थाख्यानि कर्म्मेन्द्रियाणि जायन्ते। तेषाञ्च क्रमेण वह्नीन्द्रोपेन्द्रमृत्युप्रजापतयोऽधिष्ठातृदेवताः। रजोगुणोपेतैः पञ्चभूतैरेव पञ्च वायवः प्राणापानव्यानोदानसमानाख्या जायन्ते। तत्र प्राग्गमनवान् वायुः प्राणो नासाग्रस्थानवर्त्ती। अवाग्गमनवानपानः पाय्वादिस्थानवर्त्ती। विष्वग्गमनवान् व्यानः अखिलशरीरवर्त्ती। ऊर्द्ध्वगमनवानुदानः कण्ठस्थान

वर्त्ती । अशितपीतान्नादिसमीकरणः समानः नाभिस्थानवर्त्ती । तैरेव तमोगुणोपेतैरपञ्चीकृतभूतैः पञ्चीकृतभूतानि जायन्ते तासां त्रिवृतं त्रिवृतमेकैकं करवाणीति त्रिवृत्करणश्रुतेः पञ्चीकरणोपलक्षणार्थत्वात् ।

पञ्चीकरणप्रकारश्चेत्थम् । आकाशमादौ द्विधा विभज्य तयोरेकं भागं पुनश्चतुर्द्धा विभज्य तेषां चतुर्णामंशानां वाय्वादिषु चतुर्भूतेषु संयोजनम् । एवं वायुं द्वेधा विभज्य तयोरेकं भागं पुनश्चतुर्द्धा विभज्य तेषां चतुर्णां आकाशादिषु संयोजनम् । एवं तेजोऽप्पृथिव्यंशानामपि । तदेवमेकैकभूतस्यार्द्धं स्वांशात्मकं अर्द्धान्तरञ्च चतुर्विधभूतमयमिति पृथिव्यादौ स्वांशाधिक्यात् पृथिव्यादिव्यवहारः । तदुक्तम् । वैशेष्यात्तद्वादस्तद्वाद इति ।

पूर्व्वोक्तैरपञ्चीकृतभूतैर्लिङ्गशरीरं परलोकयात्रानिर्व्वाहकं मोक्षपर्य्यन्तस्थायि मनोबुद्धिभ्यामुपेतं ज्ञानेन्द्रियपञ्चककर्म्मेन्द्रियपञ्चकप्राणादिपञ्चकसंयुक्तं जायते ॥ तदुक्तम् । पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनमिति । तच्च द्विविधं परमपरञ्च । परं हिरण्यगर्भलिङ्गशरीरम् । अपरमस्मदादिलिङ्गशरीरम् । तत्र हिरण्यगर्भलिङ्गशरीरं महत्तत्त्वम् अस्मदादिलिङ्गशरीरञ्चाहङ्कारतत्त्वमित्याख्यायते ।

एवं तमोगुणयुक्तेभ्यः पञ्चीकृतभूतेभ्यो भूम्यन्तरिक्षस्वर्गमहर्ज्जनस्तपःसत्यात्मकस्योर्द्ध्वलोकसप्तकस्य अतलपातालवितलसुतलतलातलरसातलमहातलाख्यस्याधोलोकसप्तकस्य ब्रह्माण्डस्य जरायुजाण्डजस्वेदजोद्भिज्जाख्यचतुर्व्विधस्थूलशरीराणाञ्चोत्पत्तिः । तत्र जरायुजानि जरायुभ्यो जातानि मनुष्यपश्वादिशरीराणि । अण्डजानि अण्डेभ्यो जातानि पक्षिपन्नगादिशरीराणि । स्वेदजानि स्वेदाज्जातानि यूक

मशकादिशरीराणि । उद्भिज्जानि भूमिमुद्भिद्य जातानि वृक्षादि शरीराणि । वृक्षादीनामपि पापफलभोगायतनत्वेन शरीरत्वम् ।

तत्र परमेश्वरस्य पञ्चतन्मात्राद्युत्पत्तौ सप्तदशावयवोपेतलिङ्ग शरीरोत्पत्तौ हिरण्यगर्भस्थूलशरीरोत्पत्तौ च साक्षात्कर्त्तृत्वम् इतरनिखिलप्रपञ्चोत्पत्तौ च हिरण्यगर्भद्वारा हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीतिश्रुतेः । हिरण्यगर्भोनाम मूर्त्तित्रयादन्यः प्रथमोजीवः स वै शरीरी प्रथमः स वै पुरुषउच्यते । आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्त्तत । हिरण्यगर्भः समवर्त्ततागे इत्यादि श्रुतेः ।

एवं भूतभौतिकसृष्टिर्निरूपिता ।

इदानीं प्रलयोनिरूप्यते ।

प्रलयोनाम त्रैलोक्यविनाशः । स च चतुर्व्विधः नित्यः प्राकृतो नैमित्तिक आत्यन्तिकश्चेति । तत्र नित्यप्रलयः सुषुप्तिः तस्याः सकल कार्य्यप्रलयरूपत्वात् धर्म्माधर्म्मपूर्व्वसंस्काराणाञ्च तदा कारणात्मनाव-स्थानं तेन सुप्तोत्थितस्य न सुखदुःखाद्यनुपपत्तिः नवा स्मरणानुप-पत्तिः । न च सुषुप्तावन्तःकरणस्यापि विनाशे तदधीनप्राणनादि क्रियानुपपत्तिः वस्तुतः श्वासाद्यभावेऽपि तदुपलब्धेः पुरुषान्तरविभ्रम मात्रत्वात् सुप्तशरीरोपलम्भवत् । नचैवं सुषुप्तस्य परेतादविशेषः सुषुप्तस्य हि लिङ्गशरीरं संस्कारात्मना तत्रैव वर्त्तते परेतस्य तु लोकान्तरे इति वैलक्षण्यात् । यद्वा अन्तःकरणस्य द्वे शक्ती ज्ञान शक्तिः क्रियाशक्तिश्चेति तत्र ज्ञानशक्तिविशिष्टान्तःकरणस्य सुषुप्तौ विनाशः नतु क्रियाशक्तिविशिष्टस्येति प्राणनाद्यवस्थानमविरुद्धम् । यदा सुप्तः स्वप्नं न कञ्चन पश्यति अथास्मिन् प्राणएवैकधा भवति अथैनं वाक् सर्व्वैर्नामभिः सहाप्येति सता सौम्य तदा सम्पन्नोभवति स्वमपीतोभवतीत्यादिश्रुतिरुक्तसुषुप्तौ मानम् ।

प्राकृतप्रलयस्तु कार्य्यब्रह्मविनाशनिमित्तकः सकलकार्य्यविनाशः। यदा तु प्रागेवोत्पन्नब्रह्मसाक्षात्कारस्य कार्य्यब्रह्मणो ब्रह्माण्डाधिकारलक्षणप्रारब्धकर्म्मसमाप्तौ विदेहकैवल्यात्मिका परा मुक्तिः तदा तल्लोकवासिनामभ्युत्पन्नब्रह्मसाक्षात्काराणां ब्रह्मणा सह विदेहकैवल्यं ब्रह्मणा सह ते सर्व्वे सम्प्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमितिश्रुतेः। एवं स्वलोकवासिभिः सह कार्य्यब्रह्मणि मुच्यमाने तदधिष्ठितब्रह्माण्डतदन्तर्व्वर्त्तिनिखिललोकतदन्तर्व्वर्त्तिस्थावरादीनां भौतिकानां भूतानाञ्च प्रकृतौ मायायां लयः न तु ब्रह्मणि बाधरूपविनाशस्यैव ब्रह्मनिष्ठत्वादतः प्राकृत इत्युच्यते।

नैमित्तिकप्रलयस्तु कार्य्यब्रह्मणो दिवसावसाननिमित्तकः त्रैलोक्यमात्रप्रलयो नैमित्तिकप्रलयः। ब्रह्मदिवसश्चतुर्युगसहस्रपरिमितकालः चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते इत्यादिवचनात्। प्रलयकालोऽपि दिवसकालपरिमितः रात्रिकालस्य दिवसकालतुल्यत्वात्। प्राकृतप्रलये नैमित्तिकप्रलये च पुराणवचनानि प्रमाणानि द्विपरार्द्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः। तदा प्रकृतयः सप्त कल्पन्ते प्रलयाय हि। एष प्राकृतिको राजन् प्रलयो यत्र लीयते इति वचनं प्राकृतप्रलये मानम्। एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक्। शेतेऽनन्तासने नित्यमात्मसात्कृत्य चात्मभूरिति वचनं नैमित्तिकप्रलये मानम्।

तुरीयप्रलयस्तु ब्रह्मसाक्षात्कारनिमित्तकः सर्व्वमोक्षः स चैकजीववादे युगपदेव नानाजीववादे तु क्रमेण सर्व्व एकीभवन्ति इत्यादिश्रुतेः। तत्राद्यास्त्रयोऽपि लयाः कर्म्मोपरमनिमित्ताः तुरीयस्तु ज्ञानोदयनिमित्तो लयोऽज्ञानेन सहैवेति विशेषः।

एवं चतुर्व्विधः प्रलयो निरूपितः तस्येदानीं क्रमो निरूप्यते। भूतानां भौतिकानाञ्च न कारणलयक्रमेण लयः कारणलयसमये कार्य्याणामाश्रयमन्तरेणावस्थानानुपपत्तेः किन्तु सृष्टिक्रमविपरीतक्रमेण तत्तत्कार्य्यनाशे तत्तज्जनकादृष्टनाशस्यैव प्रयोजकतया उपादाननाशस्याप्रयोजकत्वात् अन्यथा न्यायमतेऽपि महाप्रलये पृथिवीपरमाणुगतरूपरसादेरविनाशापत्तेः। तथाच पृथिव्या अप्सु अपां तेजसि तेजसो वायौ वायोराकाशे आकाशस्य जीवाहङ्कारे तस्य हिरण्यगर्भाहङ्कारे तस्य चाविद्यायामित्येवंरूप एव प्रलयः। तदुक्तम् विष्णुपुराणे। जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते। तेजस्यापः प्रलीयन्ते तेजो वायौ प्रलीयते। वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते। अव्यक्तं पुरुषे ब्रह्मन्निष्कले सम्प्रलीयते। पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः। इत्येवंविधप्रलयकारणत्वं तत्पदार्थस्य ब्रह्मणस्तटस्थलक्षणम्।

ननु वेदान्तैर्ब्रह्मणि जगत्कारणत्वेन प्रतिपाद्यमाने सति सप्रपञ्चं ब्रह्म स्यात् अन्यथा सृष्टिवाक्यानामप्रामाण्यापत्तिरिति चेन्न नहि सृष्टिवाक्यानां सृष्टौ तात्पर्य्यं किन्तु अद्वये ब्रह्मण्येव तत्प्रतिपत्तौ कथं सृष्टेरुपयोगः। इत्थं यदि सृष्टिमनुपन्यस्य प्रपञ्चस्य निषेधो ब्रह्मणि प्रतिपाद्यते तदा ब्रह्मणि प्रतिषिद्धस्य प्रपञ्चस्य वायौ प्रतिषिद्धस्य रूपस्येव ब्रह्मणोऽन्यत्रावस्थानशङ्कायां न निर्व्विचिकित्समद्वितीयत्वं प्रतिपादितं स्यात्। ततः सृष्टिवाक्यात् ब्रह्मोपादेयत्वज्ञाने सति उपादानं विना कार्य्यस्यान्यत्र सद्भावशङ्कायां निरस्तायां नेति नेतीत्यादिना ब्रह्मण्यपि तस्यासत्त्वोपपादनेन प्रपञ्चस्य तुच्छत्वावगमे निरस्तनिखिलद्वैतविभ्रममखण्डं सच्चिदानन्दैकरसं ब्रह्म सिध्यतीति परम्परया सृष्टिवाक्यानामप्यद्वितीये ब्रह्मण्येव तात्पर्य्यम्।

उपासनाप्रकरणपठितसगुणब्रह्मवाक्यानान्तु उपासनाविध्यपेक्षित गुणारोपमात्रपरत्वं न सगुणपरत्वं निर्गुणप्रकरणपठितानां सगुण वाक्यानान्तु निषेधवाक्यापेक्षितनिषेध्यसमर्पकत्वेन विनियोगइति न किञ्चिदपि वाक्यमद्वितीयब्रह्मप्रतिपादनेन विरुध्यते।

तदेवं स्वरूपतटस्थलक्षणलक्षितं तत्पदवाच्यमीश्वरचैतन्यं मायाप्रतिबिम्बरूपमिति केचित्। तेषामयमाशयः। जीवपरमेश्वर साधारणचैतन्यमात्रं बिम्बं तस्यैव बिम्बस्याविद्यात्मिकायां मायायां प्रतिबिम्बमीश्वरचैतन्यं अन्तःकरणेषु प्रतिबिम्बं जीवचैतन्यं कार्य्योपाधिरयं जीवः कारणोपाधिरीश्वरइतिश्रुतेः। एतन्मते जलाशयगतशरावजलगतसूर्य्यप्रतिबिम्बयोरिव जीवपरमेश्वरयोर्भेदः। अविद्यात्मकोपाधेर्व्यापकतया तदुपाधिकेश्वरस्यापि व्यापकत्वं अन्तःकरणस्य परिच्छिन्नतया तदुपाधिकजीवस्यापि परिच्छिन्नत्वम्।

एतन्मतेऽविद्याकृतदोषाः जीवे इव परमेश्वरेऽपि स्युः उपाधेः प्रतिबिम्बपक्षपातित्वादित्यस्वरसाद्बिम्बात्मकमीश्वरचैतन्यमित्यपरे। तेषामयमाशयः। एकमेव चैतन्यं बिम्बत्वाक्रान्तमीश्वरचैतन्यं प्रतिबिम्बत्वाक्रान्तं जीवचैतन्यम्। बिम्बप्रतिबिम्बकल्पनोपाधिस्तु एकजीववादेऽविद्या अनेकजीववादे त्वन्तःकरणान्येव अविद्यान्तःकरणरूपोपाधिप्रयुक्तोजीवपरमेश्वरयोर्भेदः। उपाधिकृतदोषास्तु प्रतिबिम्बे जीवे एव वर्त्तन्ते नतु बिम्बे परमेश्वरे उपाधेः प्रतिबिम्बपक्षपातित्वात्। एतन्मते च गगनसूर्य्यस्य जलादौ भासमानप्रतिबिम्बसूर्य्यस्येव जीवपरमेश्वरयोर्भेदः।

ननु ग्रीवास्थमुखस्य दर्पणप्रदेशे इव बिम्बचैतन्यस्य परमेश्वरस्य जीवप्रदेशेऽभावात् तस्य सर्व्वान्तर्यामित्वं न स्यात् इति चेन्न साभ्रनक्षत्रस्याकाशस्य जलादौ प्रतिबिम्बितत्वेऽपि बिम्बभूतमहाकाशस्यापि

जलादिप्रदेशे सम्बन्धदर्शनेन परिच्छिन्नबिम्बस्य प्रतिबिम्बदेशासम्बन्धित्वेऽपि अपरिच्छिन्नब्रह्मबिम्बस्य प्रतिबिम्बदेशे सम्बन्धाविरोधात् । नच रूपहीनस्य ब्रह्मणो न प्रतिबिम्बसम्भवः रूपवतएव तथात्वदर्शनादिति वाच्यं नीरूपस्यापि रूपस्य प्रतिबिम्बदर्शनात् नच नीरूपस्य द्रव्यस्य प्रतिबिम्बाभावनियमः आत्मनोऽद्रव्यत्वाभावस्योक्तत्वात् एक एव हि भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्रवत् । यथाह्ययं ज्योतिरात्मा विवस्वानपोभिन्ना बहुधैकोऽनुगच्छन् । उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा इत्यादिवाक्येन ब्रह्मप्रतिबिम्बाभावानुमानस्य बाधितत्वाच्च ।

तदेवं तत्पदार्थो निरूपितः ।

इदानीं त्वम्पदार्थो निरूप्यते ।

एकजीववादेऽविद्याप्रतिबिम्बो जीवः अनेकजीववादे तु अन्तःकरणप्रतिबिम्बः स च जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयवान् । तत्र जाग्रद्दशा नाम इन्द्रियजन्यज्ञानावस्था अवस्थान्तरे इन्द्रियाभावान्नातिव्याप्तिः । इन्द्रियजन्यज्ञानञ्चान्तःकरणवृत्तिः स्वरूपज्ञानस्यानादित्वात् ।

साचान्तःकरणवृत्तिरावरणाभिभवार्थेत्येकं मतम् । तथाहि अविद्योपहितचैतन्यस्य जीवत्वपक्षे घटाद्यधिष्ठानचैतन्यस्य जीवरूपतया जीवस्य सर्व्वदा घटादिभानप्रसक्तौ घटाद्यवच्छिन्नचैतन्यावरकमज्ञानं मूलाविद्यापरतन्त्रमवस्थापदवाच्यमभ्युपगन्तव्यम् । एवं सति न सर्व्वदा घटादेर्भानप्रसङ्गः अनावृतचैतन्यसम्बन्धस्यैव भानप्रयोजकत्वात् । तस्य चावरणस्य सदातनत्वे कदाचिदपि घटभानं न स्यादिति तद्भङ्गो वक्तव्ये तद्भङ्गजनकं न चैतन्यमात्रं तद्भासकस्य तदनिवर्त्तकत्वात् नापि वृत्त्युपहितं चैतन्यं परोक्षस्थलेऽपि तन्निवृत्त्या-

प्रतेरिति परोक्षस्थले वृत्तिविशेषस्य तदुपहितचैतन्यस्य वा आवरण भञ्जकत्वमित्यावरणाभिभवार्था वृत्तिरुच्यते ।

सम्बन्धार्था वृत्तिरित्यपरं मतम् । तथाविद्योपाधिकोजीवो ऽपरिच्छिन्नः स च घटादिप्रदेशे विद्यमानोऽपि घटाद्याकारापरोक्ष वृत्तिविरहदशायां न घटादिकमवभासयति घटादिना समं सम्बन्धा भावात् तत्तदाकारवृत्तिदशायां तु भासयति तदा सम्बन्धसत्त्वात् ।

ननु अविद्योपाधिकस्य जीवस्यापरिच्छिन्नस्य स्वतएव समस्तवस्तु सम्बद्धस्य वृत्तिविरहदशायां सम्बन्धाभावाभिधानमसङ्गतं असङ्गतत्व इष्ट्या सम्बन्धाभावाभिधाने च वृत्त्यनन्तरमपि सम्बन्धो न स्यादिति चेत् । उच्यते । नहि वृत्तिविरहदशायां जीवस्य घटादिना सह सम्बन्धसामान्यं निषेधामः किन्तर्हि घटादिभानप्रयोजकं सम्बन्धवि- शेषम् । स च सम्बन्धविशेषो विषयस्य जीवचैतन्यस्य च व्यङ्ग्यव्यञ्जकता लक्षणः कादाचित्कस्तत्तदाकारवृत्तिनिबन्धनः । तथाहि तैजसमन्तः- करणं स्वच्छद्रव्यत्वात् स्वतएव जीवचैतन्याभिव्यञ्जनसमर्थं घटादिकन्तु न तथा अस्वच्छद्रव्यत्वात् । स्वाकारवृत्तिसंयोगदशायान्तु वृत्त्यभि- भूतजाड्यधर्मकतया वृत्त्युत्पादितचैतन्याभिव्यञ्जनयोग्यताश्रयतया च वृत्त्युदयानन्तरं चैतन्यमभिव्यनक्ति । तदुक्तं विवरणे अन्तःकरणं हि स्वस्मिन्निव स्वसंसर्गिण्यपि घटादौ चैतन्याभिव्यक्तियोग्यतामापा- दयतीति । दृष्टञ्चास्वच्छद्रव्यस्यापि स्वच्छद्रव्यसम्बन्धदशायां प्रतिबिम्ब ग्राहित्वं यथा कुड्यादे र्जलादिसंयोगदशायां मुखादिप्रतिबिम्ब ग्राहिता । घटादेरभिव्यञ्जकत्वञ्च तत्प्रतिबिम्बग्राहित्वं चैतन्य स्याभिव्यक्तत्वञ्च तत्र प्रतिबिम्बितत्वम् । एवंविधाभिव्यञ्जकत्वसिद्ध्यर्थ- मेव वृत्तेरपरोक्षस्थले बहिर्निर्गमनाङ्गीकारः । परोक्षस्थले तु वह्न्यादेर्वृत्तिसंयोगाभावेन चैतन्यानभिव्यञ्जकतया नापरोक्षत्वम् ।

एतन्मते च विषयाणामपरोक्षत्वं चैतन्याभिव्यञ्जकत्वमिति द्रष्टव्यम्।

एवं जीवस्यापरिच्छिन्नत्वेऽपि वृत्तेः सम्बन्धार्थत्वं निरूपितम्।

इदानीं परिच्छिन्नत्वपक्षे सम्बन्धार्थत्वं प्रतिपाद्यते। तथाहि अन्तःकरणोपाधिकोजीवस्तस्य च न घटाद्युपादानता घटादिदेश-सम्बन्धात् किन्तु ब्रह्मैव घटाद्युपादानं तस्य मायोपहितस्य चैतन्यस्य सकलघटाद्यन्वयित्वात्। अतएव ब्रह्मणः सर्व्वज्ञता तथाच जीवस्य घटाद्यधिष्ठानब्रह्मचैतन्याभेदमन्तरेण घटाद्यवभासासम्भवे प्राप्ते तदवभासाय च घटाद्यधिष्ठानब्रह्मचैतन्याभेदसिद्ध्यर्थं घटाद्याकार वृत्तिरिष्यते।

ननु वृत्त्यापि कथं प्रमातृचैतन्यविषयचैतन्ययोरभेदः सम्पाद्यते घटान्तःकरणरूपोपाधिभेदेन तदवच्छिन्नचैतन्ययोरभेदासम्भवादिति चेन्न वृत्तेर्व्विषयदेशनिर्गमनाङ्गीकारेण वृत्त्यन्तःकरणविषयाणामेक देशस्थत्वेनोपाधेयभेदाभावस्योक्तत्वात्। एवमपरोक्षस्थले वृत्तेर्म्मत-भेदेन विनियोग उपपादितः।

इन्द्रियाजन्यविषयगोचरापरोक्षान्तःकरणवृत्त्यवस्था स्वप्नावस्था। जाग्रदवस्थाव्यावृत्त्यर्थमिन्द्रियाजन्येति अविद्यावृत्तिमत्यां सुषुप्तावति व्याप्तिवारणाय अन्तःकरणेति।

सुषुप्तिर्नाम अविद्यागोचराविद्यावृत्त्यवस्था। जाग्रत्स्वप्नयो रविद्याकारवृत्तेरन्तःकरणवृत्तित्वान्न तत्रातिव्याप्तिः। अत्र केचित् मरणमूर्च्छयोरवस्थान्तरतामाहुः। अपरे तु सुषुप्तावेव तयोरन्त र्भावमाहुः। तत्र तयोरवस्थात्रयान्तर्भावबहिर्भावयोः त्वम्पदार्थ निरूपणे उपयोगाभावान्न तत्र प्रयत्यते। तस्य च मायोपाध्यपेक्षयैकत्वं अन्तःकरणोपाध्यपेक्षया च नानात्वं व्यवह्रियते। एतेन जीवस्याणु त्वं प्रत्युक्तं बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोऽपि दृष्ट